... त्वजातिविशेषो वा न त्ववच्छिन्नपरिमाणवत्त्वं तथा सति मनःपरिमाण
... नाधिकरणतादृशसाध्याभाववयोरेकाधिकरणाप्रसि
राद्धयोरेव साधनसमानाधिकरणत्वं दृष्टव्यं न तु साधनसमानाधिकरणयत्किंचिद्व्यक्ति
ध्याप्तिव्याप्त्यसंभवादिति ... कूटस्य निवेशान्न दोषः क्वचिदपि स्पर्शवद्भिन्ने भूतत्वमि
त्तिसामान्याभावकूटस्य ... घटितसाध्याभावकूटवत्त्वमात्रोपनेसि
कर्त्तव्योभयोरसत्त्वात् तत्तदुभयान्यतरघटितसाध्याभावानामैक्यमते भूतत्वमूर्त्तत्वान्यतरत्वा
च हेतोः सत्त्वात् वस्तुतः तदुभयमनियतत्वाभावानामैक्यमते मूर्त्तत्वगगनत्वान्यतरत्वा
वच्छिन्नाभावस्य च भूतत्वमनस्त्वान्यतरत्वावच्छिन्नस्य मूर्त्तत्वगगनत्वान्यतरत्वा
स्य चार वच्छिन्नस्य ... भावः तथा च मनस्त्वगगनत्वयोरपि भूतत्वमूर्त्तत्वान्यतरत्वा
वच्छिन्नाभावस्य साध्यस्याभाववत्त्वात् हेतुसमानाधिकरणतदुभयपर्याप्ति
वच्छिन्नाभावस्य साध्यस्याभाववत्त्वात् हेतुसमानाधिकरण ५॰

(31)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्कालाधिकरणत्वाप्रसिध्यैव नोक्तातिव्याप्तिः। अस्तु वा यावंति निरुक्तसाध्याभाववंति
तावतां प्रत्येकं वावच्छिन्नस्य यदधिकरणं तद्वृत्तित्वाभावाः वृत्तिमद्वृत्तमो यावंतस्तद्वत्त्व
मेव व्याप्तिः। तथा च भूतत्वमूर्त्तत्वाद्यन्यतमत्वाभावाभाववत्त्वावच्छिन्नस्याधिक
स्या ५ रणे गगने मनसि च हेतोः सत्वान्नातिव्याप्तिरत आह किंचेति। ननु भूतत्वमूर्त्तत्वा
न्यतरत्वावच्छिन्नाभाववत्त्वाभावोऽनुगतव्यवहारादतिरिक्त एव ननु भूतत्वमूर्त्तत्वोभ
यस्वरूपः तथा च साधनसमानाधिकरणतादृशाभाववति गगने मनसि वा हे
तोः सत्वान्नातिव्याप्तिरतः किंचेति सपि वदंति। अस्मद्गुरुचरणास्तु ननु यावं
तो हेतुसमानाधिकरणाः पदार्थाः साध्यनद्वृत्तित्वव्याधिकरणधर्मावच्छिन्ना
भाववंति भिन्नत्वोभयाभाववंतस्तावत्प[illegible]दार्थकृताधिकरणवृत्तित्वाभावा
वृत्तिमद्वृत्तयो यावंतस्तद्वत्त्वं विवक्षितं तथा च हेतुसमानाधिकरणयोर्गगनत्व
मनस्त्वयोरेव तादृशपदार्थयोरेकाधिकरणाप्रसिध्या नातिव्याप्तिः निरुक्तो
भयाभाववतां घटत्वपटत्वादीनामेकाधिकरणाप्रसिध्या वह्निमान् धूमादि
त्यादावव्याप्तिर्हेतुसामानाधिकरण्यमपि सतः किंचेत्यतिम आह। कालान्यत्वे
साध्यके स्वकालिकसंबंधेन हेतोर्विरुद्धत्वादेव तत्र नातिव्याप्तिरत उक्तं महेति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम

तथाच महाकालान्यो घटादिसाध्यावतिव्याप्तिरित्यर्थः वृत्तिमन्मात्रस्यैवेति तथाच महाकालवृत्ति
त्वसामान्याभावस्य वृत्तिमद्वृत्तित्वाभावात् व्यधिकरणधर्मावच्छिन्नाभावस्य च यावत्तत्त्व
हेतौ सत्त्वादतिव्याप्तिरिति भावः। अत्र केचित् सार्वभौममते सामानाधिकरण्यस्याव्याप्यवृत्ति
त्वात् संयोगकालावच्छेदेन घटादावेव वृत्तिमति वर्तमानस्य महाकालवृत्तित्वसामान्याभा
वस्य स्वावच्छेदकाधिकरणावच्छेदेन हेतावसत्त्वान्नातिव्याप्तिः वृत्तिमद्वृत्तौ यावन्तस्तादृशा
वृत्तित्वाभावा हेत्वधिकरणावच्छेदेन तद्वत्वस्य विवक्षितत्वात् अत एव रूपाभिन्नं गु ता॰त॰ ६
णत्वादिसाध्यके तद्रूपभिन्नसमवेतत्वसमनियतप्रतियोगिताकस्य व्यधिकरणधर्मा
वच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वेऽपि नातिव्याप्तिः तद्रूपावच्छेदेन गुणत्वादावेव वर्त
मानस्य तद्रूपभिन्नसमवेतत्वसामान्याभावस्य हेत्वधिकरणगुणान्तरावच्छेदेन हे
तावसत्त्वादित्याहुः तच्चिन्त्यं यतः वृत्तिमद्वृत्तित्वं यदि स्ववृत्तिमद्वृत्तित्वसाध्याभाव इति तत्प्र
तियोगि[illegible]कत्वे नयानधिकरणत्वसमर्थः तथाच महाकालवृत्तित्वसामान्याभावस्याधि
साध्यवद्वृत्तित्वप्रतियोगिकत्वविरहेण निरुक्तोभयानधिकरणस्य हेतावसत्त्वान्महाकाला
न्यो घटादिसाध्यके नातिव्याप्तिः न च महाकालवृत्तित्वत्वापेक्षया लघोः कालिकसंबं
धावच्छिन्नवृत्तित्वस्यैव महाकालवृत्तित्वाभावप्रतियोगितावच्छेदकतया महा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालवृत्तित्वसामान्याभावस्य न निरुक्तवृत्तिमद्वृत्तित्वं अप्रसिद्धत्वात् व । तत्वसामान्या
भावस्य च वृत्तिमद्वृत्तेस्तस्य साध्यवद्वृत्तित्वप्रसक्तौ तिप्रयोगिकत्वादिति वाच्यं । यावंति
कालिकसंबंधेन महाकालवृत्तित्वानि तावदन्यतमत्वावच्छिन्नाभावस्य तावद्धर्मिकत्व
किंचित्कृष्टविशेष्यतावच्छिन्नाभावस्य वा निरुक्तोभयानधिकरणस्य हेतोः तावत्वे
न तत्साध्यवति व्याप्त्यसंभवात् कालिकसंबंधावच्छिन्नवृत्तित्वत्वमपेक्ष्य तावदन्यतमत्व
लक्षणाखंड [illegible] नातिप्रसंग [illegible] इत्यादि [illegible]
सत्तानभिन्नं घटादिसाधारणविषयितासंबंधेन हेतावतिव्याप्तेर्वै [illegible] न्नत्वात् निरूप
त्वानविषयत्वसामान्याभावस्याप्रसिद्धत्वात् यधिकरणधर्मावच्छिन्नाहरापयिष
यिताभावस्य यावत एव हेतावसत्वात् । न चास्तु साधनसमानाधिकरणाभाव
व्याप्यवत्त्वं यः साध्याभावः साध्यसामानाधिकरण्यापन्नतावच्छेदकाधिकरणवृत्तित्वा
भावोपि विवक्षितः । तथा च व्यभिचारिमात्र एव साध्यसामान्याभावघटितकूटे सा
ध्यसामानाधिकरण्याप्रसिध्या नातिव्याप्तिः । यावंतस्तादृशाः साध्याभावास्तत्कूटा
धिकरणस्य वा साध्यवत्त्वं विवक्षितं लाघवात् तादृशाभावस्य यावत्त्वं वृत्ति
मद्वृत्तित्वेनानापेक्षितं वैयर्थ्यात् इत्थं च साधनसमानाधिकरणा यावंतस्तादृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शि॰ दि॰ ज॰ ५२ श्रीराम

रणः साध्याभावाः साध्याश्रयीभूततावन्निष्ठाधिकरणवृत्तित्वमपि लक्षणं साध्यीय
इति प्राहुः । वस्तुतः पूर्वलक्षणे वात्रापि वृत्तिमद्वृत्तित्वपर्याप्त्यावतः साध्याभाव
वद्वृत्तित्वाभावोऽस्तु दृश्यावच्छिन्नाधिकरणतानिरूपकधर्मवत्त्वं मेन व्याप्तिर्वाच्या तत्र
वृत्तिमद्वृत्तित्वं साध्याभाववद्वृत्तित्वं च देशिकविशेषणतयैव वक्तव्यमतो न कोऽपि
दोषः पदमादधातीस च धातव्यमिति दिक् ॥ ॥४॥ ४ ॥ एतेनेति महाक्रा
न्तान्यो घटादिसाधवतिप्रसंगो नेसर्थः परास्तमिति परणान्वयः नज्त्रवाच्यराय
नासत्तावान् द्रव्यत्वादि साधौ नानाव्यक्तिवृत्ति साध्यकसद्धेतौ तद्व्यक्तिवृत्ति सविशिष्टसाध्या
भावस्य तदन्यवृत्तित्वविशिष्टसाध्याभावस्य च द्वयोः साधनसमानाधिकरणयोरेकाधिकर
णाप्रसिद्ध्या साधनाधिकरणयत्किंचिद्व्यक्तिवृत्तिकृताधिकरणवृत्तित्वसामान्याभावानो
हेतावसत्त्वेनाव्याप्तिरतः प्रतियोगितावृत्त्यावदभावविशेषणविशिष्टसत्तावान् जाते
रित्सादौ जातिसमानाधिकरणस्य साध्याभूतसत्त्वव्यापकतावच्छेदकरूपावच्छिन्नाभा
वस्य व्यधिकरणधर्मावच्छिन्नाभावत्वनियमात् वृत्तिमद्वृत्तेः तन्निष्ठाधिकरणवृत्ति
ताभावस्य यावत एव हेतौ सत्त्वादतिव्याप्तिरतः साध्यतावच्छेदकावच्छिन्नेति । तत्पा
चगुणान्यत्वाभावकर्मान्यत्वाभावयोरनुगतरूपावच्छिन्नप्रतियोगिताकसाधू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदुभयघटितकूटाधिकरणाप्रसिद्ध्येन नातिव्याप्तिः अत्रापि येन संबंधेन व्यापकता तेनैव सं
बंधेनाभावो निवेश्यः तेन समवायावच्छिन्नवन्ह्यभावघटितकूटाधिकरणवृत्तित्वाभावस्य
वन्ह्यवयवत्वादिनिष्ठस्य हेतावसत्वेपि वह्निमान् धूमादित्यादि पर्वतत्वादिसत्वादौ नाव्याप्तिः न
तु विशेषणताविशेषेण साध्यव्यापकत्वं तादृशरूपावच्छिन्नाभावस्य त्वत् इति युक्तं
साध्यस्य गुणसामान्यस्याभाव इत्याद्युत्तरग्रंथविरोधात् गुणस्य देशिकविशे
षणतासंबंधेन गुणाव्यापकत्वात् यत्तु साध्यतावच्छेदकसंबंधेनैव व्यापकत्वं तेन तादृश
रूपावच्छिन्नाभावं च निवेशयेति तन्तुच्छं वस्तुनियामकसंबंधेन साध्यतायां तदवच्छिन्न
प्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिप्रसंगात् पूर्वापूर्वयान्यूनवन्हेरित्यादावतिव्याप्तेश्च संयोगेन
द्रव्यस्याव्याप्यवृत्तितया व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकानामेव संयोगसंबंधा
वच्छिन्नद्रव्यत्वाभावानां व्याप्यवृत्तित्वात् तत्कूटाधिकरणवृत्तित्वसामान्याभावस्य
वृत्तिमत्स्वरूपस्य तादात्म्येन प्रमेयव्यापकतावच्छेदके पतत्प्रमेयत्वसाध्यकसत्वादिकं तेन संबं
धेन तदवच्छिन्नाभावाप्रसिद्ध्या तादात्म्येन प्रमेयसाध्यकसद्धेतावव्याप्तेरसंकु
रुवेदितत्वाच्च न च द्रव्यं घटादिसत्वं कालिकसंबंधेन हेतावतिव्याप्तिः साधनस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(रो.१२.५३. = तु भावत्वतुमन्यतयोरभावकूटाधिकरणा = भावाभिपदस्य प्रसिद्ध्यभिमानादिति कूटाधिकरणाप्रसिद्धिरिति दूषितपक्षानुधावनम्
= प्रतिबध्येऽवच्छेदकाधिकरणमिति भावः =)

समानाधिकरणस्य द्रव्यत्वाभावकूटस्य कालिक[...]नाधिकरणे महाकाले हेतुतावच्छेदकसंबंधे
न वृत्तिमत्त्वमात्रस्यैव वृत्तेरिति नोच्यं । दैशिकविशेषणतया यावदभावाधिकरणत्वस्य निवेश
नीयत्वादिति भावः । तद्वृत्तिभिन्नं घटत्वादिसाहित्यसाध्यतावच्छेदकरूपावच्छिन्न
प्रतियोगिताकयावदभाववदभावाधिकरणीभूततद्वृत्तिव्यक्तिवृत्तित्वस्य स्वाधिकरणधर्मावच्छि
न्नाभावानां घटत्वेपी सत्वात् त्वव्याप्तिरतउक्तं यावत्वेति वह्नि संयोगसामान्याभा
वत्वावच्छिन्न धूमादिसाध्यव्याप्तिः साधनसमानाधिकरणस्य साध्यतावच्छेदकीभू
तवह्निसंयोगसामान्याभावत्वा[...]वच्छिन्नप्रतियोगिताकस्य वह्निसंयोगाद्या
त्मकाभावकूटस्याधिकरणाप्रसिद्धेर्नोऽव्याप्तिर्वृत्तिपदमिसाहके वले [?]साध्यितानाकेव
लान्वयिनइसेनेन साध्यव्यापकत्वसमावि[...]संयोगादीसाविनावह्निसंयोगत्वाव
वच्छिन्नाभावस्योपग्रहः । तेन प्राचां मते द्रव्यसंयोगे सामान्याभावस्यासत्वेपि
न क्षतिः दैशिकाव्याप्यवृत्तिसाध्यकेप्रयोजनमुक्त्वा कालिकाव्याप्यवृत्तिसाध्य
केतदाह एवमितिः ननु तादृशरूपावच्छिन्नप्रतियोगिकानां वास्तवाभावानामे
वलक्षणघटकत्वात् संयोगाद्यात्मकाभावमादाय नाव्याप्तिरतउक्तमेवमिसपिके

= यावद्वह्निसंयोगाधिकरणाप्रसिद्धिरित्यत एवमुक्तत्वसाध्याभाव
= कूटस्याधिकरणमप्रसिद्धं =७ ५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्‌ न व्याप्यवृत्तिरिति । तथा च गुणसामान्याभावस्य साधनसमानाधिकरणत्वेपि व्याप्य
वृत्तित्वाभावादेव गुणवान्‌ द्रव्यत्वादित्यादौ नाव्याप्तिः अन्यथा गुणसामान्याभावस्यापि
साधनसमानाधिकरणसाध्याभावत्वेन पातनीयतत्कूटाधिकरणसमवेतत्वे सामान्याभाव
स्य वृत्तिमत्तनिसेकत्वादौ प्रसिद्ध्यद्भवलतहेतावसत्त्वाद व्याप्तिरेव स्यादिति भावः
स्वसमानाधिकरणस्येत्यस्य फलमाह उक्तेति । साध्यव्यापकतावच्छेदकरूपावच्छिन्नो स
र्थः कश्चिदिति वह्निमान्‌ धूमादित्यादौ घटपटाद्यात्मकतत्तद्विपक्षावृत्तित्वावच्छिन्ना भा
वकूटस्यापि निरुक्ताभावतया तदधिकरणाप्रसिद्धिनिबंधनाव्याप्तिवारणार्थमेव
स्वसमानाधिकरणेत्युक्तमिति भावः तद्घटभिन्नं पटत्वादित्यादौ साध्यव्यापकतावच्छे
दकरूपावच्छिन्नप्रतियोगिताकाभावकूटत्वेन तत्तद्घटस्य प्रसिद्धमतः तत्राव्याप्त्यसं
भव [illegible] । अत्र हेत्वधिकरणयत्किंचिद्व्यक्तौ देशिकविशेषणतया वर्त्त
मानत्वमेव हेतुसामानाधिकरण्यं बोध्यं तेन एकाशिवा द्रव्यत्व [illegible]
त्वादिसाधौ जलेतेजसि च साधनसमानाधिकरणस्य जलत्वाद्यभावस्य तेऽत्रो
त्वसभावस्य निरुक्तरूपावच्छिन्नप्रतियोगिताकत्वात्‌ तदुभयकूटाधिकरणाप्रसि

१३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धौहेतोरवृत्तित्वेपि नातिव्याप्तिः हेत्वधिकरणजलादिप्रसक्तनिष्ठयत्तादृशाकूटं तद
धिकरणे जलादौ हेतोः सत्वादिति भावः उक्तकूटघटकमहाकालादितादृशाभावसमुदाया
धिकरणावृत्तित्वात्तु तावच्छेदक [illegible]
समानाधिकरणसाध्याभावकूटाधिकरणे महाकाले वृत्तिमन्मात्रस्यैव कालिक
संबंधेन वृत्तावपि नातिव्याप्तिः तादृशावृत्तित्वाभावस्य तादृशवृत्तित्वस्य सम
यतप्रतियोगिताकत्वमात्रस्य तेन पर्वतवृत्तित्वसामान्याभावस्य वृत्तित्वात्तोकान्यसो
भयत्वावच्छिन्नाभावस्य च हेतावसत्वेपि वह्निमान् धूमात् इत्यादौ साध्ये
संभवः अधिकृतस्थितिप्राप्ता वृत्तिमत्त्वतीयं इसत्रापि वृत्तिमत्त्वं हेतुतावच्छेदक
संबंधेन ग्राह्यं तेन संयुक्तत्वसामान्याभावस्यापि तादृशस्य [illegible] समवायेन व
त्तिमत्तिप्रायत्वादौ प्रसिद्धस्य हेतावसत्वेपि वह्निमान् धूमादिसाध्ये नाव्या
प्तिरिति भावः साध्यवत्ताज्ञानविरोधिताघटकसंबंधेनैव कूटाधिकरणतायाः
पूर्वमुक्तत्वात् प्रकृतलक्षणाघटकत्वोक्तेः इत्यादिकमिसाधिपदेन गु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोः प्रतियोगितावच्छेदकत्वमते तादृशावृत्तित्वस्यावच्छिन्नाभावावृत्तिमत्त्वतयो
पादेतत्स्तदादर्शितसादेः सूच्यते ॥ ५ ॥ ॥ अभाववृद्धो प्रतियोगितावच्छेद
विशिष्टप्रतियोगिज्ञानजन्येन कारणतायाः स्व[illegible]तावापि तादृ
शिरोमणौ नेति ननु घटत्वेन घटो नास्तीत्यादि बुद्ध्यहे घटत्वोदि विशिष्ट
वैशिष्ट्यावगाहित्वमेवासिद्धमत आह अभावेत्यादि । नव्यास्तन्त्रेणेति । नघ ३६
त्वादेः प्रतियोगितावच्छिन्नत्वमविषयीकृत्य मर्थः । नञर्थे घटवच्छिन्नप्रतियोगित
संसर्गकाभावप्रसङ्गस्य तादृशसंबन्धेन तद्धर्मविशिष्टवैशिष्ट्यावगाहित्वेनि
यमादिति भावः । ननु तद्धटत्वेन घटो नास्तीत्याकारक समानाधिकरणधर्माव
च्छिन्नाभावप्रसक्तेर्व्यभिचारान्नो नियम इत्यत आह घटो नास्तीत्येवेति
तथाच विशेषधर्मेण सामान्याभावो प्रसिद्ध एव तद्घटत्वेन घटो नास्ती
तिप्रतीतेर्घटेतद्घटत्वाभावमात्रावगाहित्वात् तत्र हेत्वभावादेव न व्य
भिचारः अन्यथा सामान्यरूपेण विशेषाभावस्यापि स्वीकारापत्तेः वाच्यत्वेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घटो नास्तीत्यपि प्रत्ययः [illegible] भावः प्रकृते प्रत्ययोऽयमिति तदिदेति हृदय
ट्त्वेन घटो नास्ति [illegible] स्थले तस्य व्यधिकरणधर्मास्य। अयथावगाहित्वमिति व्यधिक
रणधर्मेण विशिष्टप्रतियोगि [illegible] निरुक्ते नान्वयः न च तत्तद्वृत्ति। प्रमाया एवार्थसाधकत्वादिति
भावः ननु तत्र व्याप्येव रप्रयोजकत्वात् घटत्वादेः प्रतियोगिवृत्तित्वमनवगाह्यापि तदनवच्छेदकसा
वगाहित्वसंभवात् व्यधिकरणधर्मावच्छिन्नाभावः सेत्स्यतीति सत आह यदि पुनरिति। स्वरस
वाही यथार्थः स च पटे घटत्वमनवगाहमान एव संभवतीति भावः घटत्वेन पटो नास्तीत्यादि
रित्यादिपदेन घटत्वेन द्रव्यं नास्ति। द्रव्यत्वेन घटो नास्तीत्याद्यनुभवस्योपगमः तुल्ययुक्त्यात
दृष्टिधर्मेण तस्यैव विशेषरूपेण सामान्यस्य सामान्यरूपेण विशेषस्याभावे बाधकाभावा
दि[illegible] घटो नास्तीति पाठे घटत्वेन [illegible] विशिष्टे नेत्यर्थः। तेन तादृश्ये
णप्रतियोग्यंशे घटत्वमनवगाह्य ज्ञातसमानाधिकरणधर्मावच्छिन्नाभावप्रसक्त एवो
क्तनियमस्य व्यभिचारो दर्शितः तादृशाभावे इति। स्वसमनियतान्यधर्मावच्छिन्नप्रतियोगि
ताकाभाववारणमित्यर्थः। तेन सामान्यरूपेण विशेषस्य विशेषरूपेण सामान्यस्याभावः
संगृहीतः। यत्तु द्रव्यत्वेन घटो नास्तीति प्रतीतिः घटाद्यवच्छिन्नाभावेनैवोपपत्तौ सा ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व १

मान्यरूपेणविशेषाभावादेर्मानाभावइतितत्प्रागेवदूषितमिति।यदपिसंयोगादिसंसर्गकघ
टत्वावच्छिन्नाभावत्वावच्छेदेनलाघवात्तादृशसंबंधेनघटत्वावच्छिन्नस्यविरोधित्वा
कल्पनात्संयोगेनघटादिमतिघटत्वादिनापराद्यभावस्यासंभवइतिकेचित्तुतदप्य
संगतंतावतापिगगनत्वादिनाघटत्वादेःवाच्यत्वादिनाज्ञेयत्वादेश्चाधिकरणधर्मावच्छिन्ना
भावस्यदुर्वारत्वादितिगगनादेरधिकरणस्यस्वरूपसंसर्गकवाच्यत्वावच्छिन्नाभाव
स्यचाप्रसिध्यातत्रविरोधित्वस्यकल्पयितुमशक्यत्वादितिदिक् ॥ श्रीकृष्णोजयति श्रीराम ॥
॥ कृष्णायवासुदेवायहरयेपरमात्मने। प्रणतक्लेशनाशायगोविंदायनमोनमः ॥ श्रीरामचंद्रं
॥ जगदादिमूलंसीताप्रियंभक्तजनस्यलक्ष्यं। एकांतभक्त्यासुधियैश्चमृग्यंतमादिविष्णुं
॥ सिरसानमामि ॥ १ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ ॥ ॥

142

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मान्यरूपेण विशेषाभावाद्दोमानाभाई इति तत्प्रागेव दूषितमिति। यद्यपि संयोगादिसंसर्गकघ
टत्वावच्छिन्नाभावत्वावच्छेदेन लाघवात् तादृशसंबंधेन घटत्वावच्छिन्नस्य विरोधिता
कल्पनात् संयोगेन घटादिमति घटत्वादिना पराद्यभावस्य असंभव इति केचिदुक्तं तदप्य
संगतं तावतापि गगनत्वादिना घटत्वादेः वाच्यत्वादिना ज्ञेयत्वादेश्च व्यधिकरणधर्मावच्छिन्ना
भावस्य दुर्वारत्वादिति गगनादेरधिकरणस्य स्वरूपसंसर्गकवाच्यत्वघटावच्छिन्नाभाव
स्य चाप्रसिध्या तत्र विरोधकल्पयितुमशक्यत्वादिति दिक्॥ श्रीकृष्णो जयति श्रीराम॥
॥कृष्णाय वासुदेवाय हरये परमात्मने। प्रणतक्लेशनाशाय गोविंदाय नमो नमः॥ श्रीरामचंद्र
॥जगदादिमूलं सीताप्रियं भक्तजनस्य लक्ष्यं। एकांतभक्त्या सुधियां विभाव्यं तमादिविष्णुं
॥शिरसा नमामि॥१॥ छ॥ छ॥ छ॥ छ॥ छ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नू ४

॥श्रीगणेशाधिपतये नमः॥ ननु प्रतियोगितावच्छेदकविशिष्टज्ञानं नाभावप्रत्यक्षमात्रे हेतुः इदं त्वा
त्विनाअभावप्रत्यक्षे व्यभिचारात्॥ न तावदभावप्रत्यक्षविशेषे मानाभावादत आह॥ विशेष
षणतावच्छेदकविशिष्टेति॥ विशेष्ये विशेषमिति न्यायेन च नाभावप्रत्यक्षे अननुभवात्॥ वि
वैचित्र्ये चेदमालोकि सारमंजर्यामस्माभिः॥ ननु भ्रमरूपं तत्र तज्ज्ञानं नासंभवि॥ तादृशज्ञानमा
भावदशायां तादृशज्ञानाभावधीरप्रसिद्धैवेत्यत आह॥ अभावप्रत्यक्षे हीति॥ विशेषणस्यापि विशे
षणत्वरूपविषयतावच्छिन्नस्यापि तदवच्छेदकत्वं॥ प्रतियोगितावच्छेदकत्वं॥ न स्वातंत्र्येण
ति॥ प्रतियोगिविशेषणतानवच्छेनेत्यर्थः॥ तदेव स्फुटयति॥ घटो नास्तीत्यत्रेति॥ दंडी पुरुष
इत्यत्र दंडत्वविशिष्टवैशिष्ट्यावगाहिज्ञाने पुरुषांशे विशेषणतावच्छेदकदंडत्वस्य यादृशीप्र
कारता घटो नास्तीत्यत्रापि अभावांशे ~~[illegible]~~ विशेषतावच्छेदकघटत्वस्य तादृ
शीप्रकारता ननु घटस्यैव घटत्वस्याभावांशे साक्षात्प्रकारता॥ तथा सति घटीयोऽभावो घटत्वली
य इत्याकारकप्रत्ययः स्यादिति भावः॥ एवकारेण कदापि घटत्वेन घटो नास्तीति स्वातंत्र्येण
वच्छेदकत्वावगाहिप्रत्ययो न भवतीति सूचितं॥ तस्या

Acc. NO. ~~22-1 M 7080~~ M-1529
Title - शिरोमणिटीका.
Author - टी. - ~~भवानन्दी.~~ जगदीश
Date - ?
Subject - न्याय.
Folio - 29
Xerox - 59

K K S U LIBRARY RAMTEK 441 106 ~~M 7080~~ Dist Nagpur

M-1529.

Checked 2012

Checked 2012

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पि॥ व्यधिकरणधर्मस्यापि॥ भ्रम एवेति॥ प्रतियोगिनि वैशिष्ट्यस्यानवगाहित्वाने मावच्छेदक
त्वं नावगाहते॥ इत्यत्रैकभंग्या अवच्छेदकत्वं प्रतियोगिवैशिष्ट्यघटितमित्यर्थः॥ तस्य च प्रकृते
अभावत्वभ्रम इति भावः॥ ननु तत्र घटो नास्तीत्येव प्रतीतेस्तथैवास्तु॥ अत्र तु स्वातंत्र्येणाव
गाहनात् अवच्छेदकत्वं न प्रतियोगिवैशिष्ट्यघटितं घटत्वेन घटो नास्तीत्यभावस्य दुरुपन्हव
त्वादित्यत आह॥ यदि तु नेति॥ आहार्यप्रत्ययस्य वस्तुसाधकत्वात् आह॥ स्वरसवाहीति॥
लोकानां तादृशानुभवो यथानुभविकः [illegible] अनुभवसिद्ध इत्यन्वयः॥ केचित्तु॥ घटत्वेन घटो
नास्तीत्येव पाठः॥ सामानाधिकरण्यधर्मावच्छिन्नोपि सयो हि यदि प्रतियोगिन्येव प्रतियोगिताव
भावच्छेदकस्याभावांशे वैशिष्ट्यावगाहीत्यर्थः॥ [illegible] भावनिवारणं॥ तत्तु व्यधिकर
ण धर्मावच्छिन्नप्रतियोगिताकाभावस्तत्कारणमिति व्याचख्युः॥ ननु असामानाधिक
रण्यं न तदनधिकरणवृत्तित्वं॥ केवलान्वयिन्यव्याप्तेः॥ केवलान्वयिनीत्यादिग्रंथ
विरोधाच्च॥ नापि तदनधिकरणावृत्तित्वं॥ व्यधिकरणपदवैयर्थ्यात्॥ द्रव्यं सत्वादि
साध्यवति व्याप्तिः स्यात्॥ साध्ये [illegible] त्यादि॥ केवलान्वयिनि साध्यवदवृत्तिगगनादेर

2

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिकरणाप्रसिद्ध्याऽनधिकरणत्वस्याप्रसिद्धेराह॥ तदभाववत्त्वमिति॥ ननु वह्नि
मान् धूमादित्यादौ अव्याप्तिः॥ साध्यवद्वृत्तिधूमस्य यादृशाभावस्य धूमादावभावादत आ
ह॥ तदवच्छिन्नेति॥ अनवच्छिन्नस्य कुत्राप्यभाव इत्यत आह सतीति॥ ननु अवच्छेदकत्वं अ
नतिरिक्तवृत्तित्वं॥ तथा चातिव्याप्तिर्धूमवान् वह्नेरित्यादौ धूमवद्वृत्तिसकलपदार्थ
विरहकूटस्य वन्ह्यधिकरणानतिरिक्तवृत्तित्वात्॥ वह्निमान् धूमादित्यादौ वह्निमद्वृ
त्तिसकलपदार्थमध्यनिविष्टह्रदत्वाद्यभावस्य धूमाधिकरणतातिरिक्तत्वादव्याप्तिश्चेत्यत
आह॥ अन्यूनवृत्तित्वमिति॥ धूमवान् वह्नेरित्यादौ धूमवद्वृत्तिह्रदत्वाभावस्य वन्ह्यधि
८५ करणताऽन्यूनवृत्तित्वातिव्याप्तिरत आह॥ साध्यवदवृत्तिसकलपदार्थेति॥ तत्र तादृशायो
गोलकत्वाभावस्य वन्ह्यधिकरणताऽन्यूनवृत्तित्वाभावान्नातिव्याप्तिरिति॥ साध्यवदवृ
त्तित्वस्य संबन्धभेदेन भिन्नत्वात्॥ सामान्याभावो न घटते इति भावः॥ ननु तादृशसकलप
दार्थाभाववत्त्वयदन्यूनवृत्तीत्यस्यैव सम्यक्त्वेऽप्यधिकरणेत्यत्राधिकरणपदं व्यर्थमत आ
ह॥ यथेति॥ तथाप्युन्नतिप्रयोजकाभावादाह हेतुतावच्छेदकेति॥ संयोगेन साध्यवदवृत्तेर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्योगोलकत्वादेः संयोगेनाभावस्य वन्ह्यधिकरणतान्यूनवृत्तित्वादतिव्याप्तिरतो येन
येनेति वीप्सा ॥ एतेन येनयेनेत्यादिविवक्षणेन ॥ साध्यवदसमवेतस्य ॥ आकाशाभावादेन
स्य केवलान्वयित्वादितिभावः ॥ सकलतच्छून्येति ॥ संबंधसामान्येऽन्येन तच्छून्ये सर्थः ॥
तदभावः साध्यवदवृत्तेरभावः ॥ तादृशेन साध्यतावच्छेदकेन। जातिमदिति। जातिमदसम
वेतमसमवेतमेव तस्य च समवायेनाभावः केवलान्वयीतिभावः ॥ अत एव। जातिमान्ज्ञेय
त्वादित्यादावतिव्याप्तेरेव ॥ दूषणांतरमाह ॥ इदं न जातिमदिति ॥ साध्यतावच्छेदकसंबंधेना
वृत्तित्वविवक्षायां तु प्रकृते स्वरूपसंबंधस्यैव तथात्वात्तेन संबंधेन साध्यवद्वृत्तेर्जातित्वा
भाववत्त्वप्रकारकप्रमाविशेष्यत्वाभावस्य प्रसिद्धत्वात् तदभावस्य हेत्वधिकरणतान्यूनवृ
त्तित्वान्नाव्याप्तिः संभवतीति संयोगत्वसमवायत्वादिनैव तादृशविवक्षणेऽव्याप्तिरुक्ता।
रूपभिन्नगुणत्वादित्यादौ रूपभिन्ने समवायेनासंबद्धरूपत्वादि तदभावस्य गुणत्वाऽन्यू
नवृत्तित्वाभावान्नातिव्याप्तिः संभवतीत्यत एतदिति ॥ समवेतमात्रस्यैव तद्रूपभिन्न
समवेतत्वादेस्तद्रूपभिन्नासमवेतमसमवेतमेवा समवायेन तदभावः केवलान्वयी समवेतस्यैतत् घटरूपादेः स
त्तिभावः। एतद्घटभिन्नसत्त्वादित्यादौ तु एतद्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मवान्नतत्रातिव्याप्तिः संभवतीति तन्नोक्तं॥ घटभिन्नमिति। घटभिन्नाविषयकं निर्वि
षयकमेव तस्य च विषयतयाऽभावः केवलान्वयीति भावः॥ इत्थं चापि स्वपिनाए तद्रूपभिन्नं
गुणत्वादित्वस्य संग्रहः॥ द्रव्यं सत्त्वादित्यादावित्यादिना तद्रूपभिन्नं गुणत्वात् घटभिन्नं मेय
त्वादित्यादिपरिग्रहः॥ स्वरूपसंबंधेन कालिकविशेषणतायां यत्र तत्त्वयोरननुगमात् साध्यव
दसमवेतस्य समवायेनाभावः साध्यवदसंयुक्तस्य संयोगेनाभाव इत्येवं क्रमेण निवेशेऽ
तिगौरवं तत्र च विशेषताविशेषेण साध्यवदवृत्तेरभावस्यापि निवेशनेन तेनैव सामंजस्ये तो
षवैयर्थ्यं चेत्याशयेनाह॥ विशेषणतेति॥ विशेषता च तत्तद्व्यक्तित्वस्याऽभावस्य प्रमावि
षयत्वस्य वा ग्राह्या॥ सर्वत्रैवेति। पूर्वोक्तयावद्व्यभिचारिणीत्यर्थः॥ तेन केवलान्वयि
नि तद्व्यक्तित्वादौ साध्यवदवृत्तित्वस्याप्रसिद्धावपि न क्षतिः॥ तत्र तत्तद्व्यक्तित्वं तत्तद्व्य
क्तिस्वरूपं तच्च विलक्षणतासंबंधेन स्वस्मिन्नपि वर्त्तत इत्याशयेनाह॥ तत्तद्व्यक्ति
त्व इति॥ तत्तद्व्यक्तित्वं तत्तन्मात्रवृत्तिरसाधारणो धर्मो रूपादिः स च समवायादिनैव
वर्त्तते। न विशेषणतयेत्यत आह॥ तत्तदन्यान्यत्व इति। तत्तदन्यान्यत्वमपि तत्तद्व्य
क्तित्वमेव। तदुक्तं। नहि घटभिन्नभेदो घटत्वादतिरिच्यते इति॥ तथा च स एव दोष इत्स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तआलं।।लन सकारतेति।। तथाच्चैतद्रूपभिन्नं गुणत्वादिसाध्ये एतद्रूपद्रव्यप्रकारकप्रमावि
षयत्वे विशेषणताविशेषेणैव साध्यवदवृत्तित्वेन संबंधेन तदभावस्य गुणत्वाद्यन्यूनवृत्तित्वा
भावान्नातिव्याप्तिरिति भावः।। न साध्यवदवृत्तित्वे। एवं च सामान्याभावनिवेशेऽपि सम्य
गित्याशयेनाह।। तेनैवेति। तदवच्छिन्नेति। साध्यबुद्धेरन्तित्वावच्छिन्नेत्यर्थः।। केचित्त्वि
ति। साध्यविरोधित्वं। साध्याभावव्याप्यत्वं। तच्च केवलान्वयिन्यप्रसिद्धमत आह। साध्या
समानाधिकरणानीति।। ननु साध्यासमानाधिकरणानां गगनादीनां हेतुसामानाधिक
रण्याद्व्यभिचारित्वं निर्व्याप्तिरत आह।। साध्यसामानाधिकरण्याभावेति। आ
र्द्रेंधनप्रभववह्निसामानाधिकरण्यव्यतिरेकाभावेऽस्य धूमसामानाधिकरण्याभावव्या
पकत्वाद्व्यभिचारिण्यतिव्याप्तिः। अतः सामान्येति। हेतुतावच्छेदकावच्छिन्नहेतुसामा
नाधिकरण्यस्यावच्छिन्नप्रतियोगिताकाभावत्वेन व्यापकस्य स्फोरकं। तेनायोगोलकी
यवह्निसामानाधिकरण्यस्यापि द्रव्यत्वादिनाऽभावस्य धूमसामानाधिकरण्याभावव्याप
कत्वेऽपि न क्षतिः।। न वा द्रव्यगुणकर्मान्यत्वे विशिष्टसत्त्वादिसाध्यादावतिव्याप्तिरिति। साध्य
वति। साध्यतावच्छेदकावच्छिन्नसाध्याभाववति। तेन गुणान्यत्वविशिष्टसत्तावाञ्जातेरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यादौ नातिव्याप्तिः। परंच सामानाधिकरण्यं। हेतुसामानाधिकरण्ये। हेतुमति। हेतुतावच्छे
दकावच्छिन्नहेतुमति। तेनैव हेतुतावच्छेदकसंबंधेनेत्यर्थः। तेन द्रव्यं विशिष्टसत्त्वादित्यादौ नाव्याप्तिः।
क्रमेण संबंधविवक्षायाः फलमाह। तेनेत्यादिना। पृथिवीत्ववति कालिकसंबंधेनावर्त्तमान
स्य चरमध्वंसादेर्हेत्वधिकरणे स काले वृत्तेर्नातिव्याप्तिः। अत एवोत्तरत्र पृथिवीत्वं विहाय द्र
व्यत्वे स्यात्। सत्वे हेतौ हेतुसामानाधिकरण्याभावस्य साध्यसाध्यसामानाधिकरण्याभावव्या
पकत्वं न स्वस्मिन् गुणत्वे तु स्वस्मिन्नेव वृत्तेरिति तदुदाहृतौ। परं सामानाधिकरण्यदले हेतुता
वच्छेदकसंबंधेनेत्यस्य फलमाह। न वा संयोगेनेति। वह्निमानेतद्रूपत्वादित्यादौ वह्निम
ति समवायेनावर्त्तमाने कालपरिमाणे स्पंदत्वं च चलत्वं च का... तया एतद्रूपाधिकरणे का
ले स्पंदे च समवायेन वर्त्तत इत्यव्याप्तिरित्यर्थः। स्पंदत्वादेरिति। एवं नापीत्यत्रानुपपद्यते।
तेनैवेत्यस्य फलमाह। समवायेनेति। तदधिकरणे स्वरूपाधिकरणे पर्वतादौ। संबंधविशे
पाहेतुसामानाधिकरण्ये हेतौ प्रविष्टेन। आकाशसामानाधिकरण्याप्रसिद्ध्या तद्विना
कृतलक्षणस्य तत्रातिव्याप्त्यभावादिति भावः। तच्चिंत्यमिति। एतद्रूपभिन्नगुणत्वात्लक्षा
नाहाइत्यादौ महाकालान्योन्याघटादिस्वत्व कालिकसंबंधेन हेतौ चातिव्याप्तिरित्यस्वरसः। सा
ध्यतावच्छेदकसंबंधेन साध्यवत्तिविशेषणताविशेषेणवत्वाभावव्यापको हेतुतावच्छेद
ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सि·दि·भ·

कसंबंधेन हेतुमत्ति तेनैव संबंधेन वृत्तित्वाभाव इत्युक्तौ च नायं दोष इति स्मर्त्तव्यं॥ ननु स्वोक्त
5 विवक्षायां मूलोक्तदोषासंगतिरत आह॥ यथाश्रुतमिति। ननु साध्यसामानाधिकरण्यप
दस्य साध्यवदवृत्तित्वमेव लक्षणकर्तुर्विवक्षाविषयः॥ अत एव केवलान्वयिनि प्रसिद्धि
र्निरधिकरणो दर्शिता। तथा च साध्यानधिकरणाधिकरणत्वस्य दूषणमप्रकृतमत आ
ह॥ यथासंभवमिति॥ यावंतोर्थाः संभवंति तावतां दूषणस्य सांप्रादायिकत्वादिति भा
वः॥ प्रतियोगिविरोधित्वं यदि प्रतियोग्यभावव्याप्यत्वं प्रतियोग्यनधिकरणवृत्तित्वं वा
व्याप्यवृत्तित्वं च घनवच्छिन्नाया वृत्तिस्तदसंस्वाधीकरणीभूत यत्किंचिद्व्यक्तिवस
त्वंताभावाप्रतियोगित्वं तदा नातिव्याप्तिरित्यत आह॥ प्रतियोगिविरोधित्वमिति। न तदधि
करणेति॥ प्रतियोग्यधिकरणेत्यर्थः। न सिद्ध्येदिति॥ अधिकरणानामनंतत्वान्नास्तीति
प्रतीतिनियामकत्वकल्पने गौरवादितिरिक्तोऽभावः कल्प्यत इत्येवाभावसिद्धौ बीजं॥
तत्त्वाधिकरणभेदेनाभावभेदाभ्युपगमे न संभवतीति भावः॥ ननु संयोगात्यंताभावो गु
णोऽप्रतियोग्यसमानाधिकरणो व्याप्यवृत्तिर्द्रव्ये प्रतियोगिसमानाधिकरणोऽव्याप्यवृत्ति
रिति व्यवहारात्प्रतियोगिसामानाधिकरण्यासामानाधिकरण्यव्याप्यवृत्तित्वाव्या
प्यवृत्तित्वलक्षणविरुद्धधर्मसंसर्गित्वं संयोगाभावभेदकं स्यादत आह॥ संयोगाद्यभाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रव्य इति ॥ अव्याप्यवृत्तित्वं चेत्यत्राप्यनुषज्यते ॥ गुणादावपि व्याप्यवृत्तित्वं चेत्यत्रा
नुषज्यते । अविरोधादिति । संयोगाधिकरणद्रव्यवृत्तित्वसंयोगेन धिकरणगुणावृत्ति
त्वयोराकाशाभावादौ दर्शनादिति भावः । सामान्यतो न तथा व्यतिरेक इत्यन्वयः । तथा
च स्वसमानाधिकरणात्यंताभावप्रतियोगिनि स्वसमानाधिकरणात्यंताभावप्रतियोगि
त्वाभावः न वा प्रतियोग्यधिकरणावृत्तौ प्रतियोग्यधिकरणावृत्तित्वाभाव इत्यर्थः ॥ सा
ध्यवतीति । न तु साध्ये इति भावः । स चेति । तथा च साध्यवान् यस्य स साध्यवान् यः
यदधिकरणमित्यर्थः । ननु यथा चैत्रस्य पुत्रवान् अयं देश इत्यत्र चैत्रसंबंधिपुत्रे ऽन्वे
स ति ॥ न तु पुत्रवति तथा संबंधीरूपकत्वात् तत्साध्यवान् यस्येत्यत्रापि यात्संबंधित्वं सा
ध्य एवान्वेति । तत्र व्याप्तिनिरूपकत्वमेवेत्सात्सास्त्र य इत्यत आह ॥ साध्यसाधनयोर
पीति । सामानाधिकरण्यमेव साध्यवान् यस्येत्यत्र षष्ठ्यर्थः संबंध इत्यन्वयः । साध्य
साधनयोर्धर्मिणोर्न व्याप्तिनिरूपकत्वमत आह । साध्यत्वेति । यत्तच्छब्दाभ्यामेवैकारेण स्वेद
ने३ साध्यत्वसाधनत्वयोरवच्छेदः ॥ तथा च यत्समानाधिकरणान्योन्याभावाप्रतियोगित्व
हानं तेन सममिति रीत्योऽत्यर्थः । ननु धूमसमानाधिकरणे सादिंयपि वह्नित्वविशिष्ट
वह्निरेव न तु हृदत्वादिना धूमसमानाधिकरणाभावप्रतियोगितावच्छेदक इत्यन्त

9

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मप्युक्तमेव। तथापि यद्रूपावच्छिन्नप्रतियोगितावच्छेदकं तदन्यरूपावच्छिन्नसामाना
५ धिकरण्यमित्यर्थे नास्ययं तत्तद्वह्नित्वादिना प्रतियोगितावच्छेदकमपि वह्नित्वेन प्रतियो
गितानवच्छेदकमिति मतान्तमंगीकृत्येदमुक्तमित्यन्ये। वह्निसमानाधिकरणविशेषा
भावकूटप्रतियोगितावच्छेदकतया धूमवत्त्वस्य धूमवान्वह्नेरित्यत्र नेति व्याप्तिरित्य
व्याप्तिपरतया व्याचष्टे। एवं चेति। प्रसंगे। जातिस्विकरूपेणात तत्तद्देत्यादिना। प्रमेयस्या
देरिति मूलमनुरुध्याह। वैयधिकरण्यमिति। पृथिवीति। द्रव्यत्वानधिकरणवृत्तित्व
स्य पृथिवीत्वेः सत्या[illegible]दिति भावः। धूमवान्वह्नेरित्यत्रायोगोलकीयवह्न्यनधि
८धूमे करणावृत्तित्वं वर्तत इत्यत आह हेत्वनुसरणं साधनाधिकरणो येन संबंधेन धूमस्य व
त्तित्वं तेन संबंधेन तदनधिकरणो साध्यतावच्छेदकसंबंधेन वृत्तित्वं चात्र नाहद्दावै
यधिकरण्ये तेन साधनसमानाधिकरणस्य धूमस्यैव समवायेनानधिकरणोप
वृत्तेः संयोगेन। एवं संयोगेनाधिकरणो वह्न्यवयवे समवायेन वह्नेर्वृत्तावपि न क्षतिः। धूमा
न४ देरपीति समवायेन धूमस्य साध्यताव्याप्तिव्यापिणि वह्न्यावति व्याप्तिर्बोध्या। संयोगेन
साध्यतायां द्रव्यत्वानधिकरणो गुणादौ संयोगेन वृत्तित्वस्याप्रसिद्धेर्द्रव्यत्वसमा
णायनाति व्याप्तिः संगच्छते। द्रव्यत्वादेरिति। तथा च द्रव्यत्वे पृथिवीत्वादिसाध्यकव्याप्तिरस्य वेंः॥

यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदनधिकरणेनेति॥ साधनसमानाधिकरणपदस्याधनधिकरणेऽर्थः। तथा च मा
त्रपदेन दत्तेऽपि रूपयात् पृथिवीत्वादिसत्त्वाव्याप्तिरिति भावः। नाहत्रेति। साधनसमा
नाधिकरणे सर्थः। न हीति॥ निरूपप्रत्ययाभावादिति भाव॥ घटमत्त्वादिके चेति। त
था च व्यभिचारिणि नातिव्याप्तिः। ननु अन्यूनवृत्तित्वरूपमवच्छेदकं मेयत्वादावपी त्वं
तित तत्साध्यकाव्याप्तिरत आह। तदवच्छेदकत्वमिति। तत्र न्यूनधर्मेति। धर्मत्वं। वृत्तिमत्वं।
तत्प्रयोजनमाह। तेनेत्यादिना। द्रव्यवान् मेयत्वादित्यत्र समवायेन द्रव्यस्य साध्यतायां
मेयत्वसमानाधिकरणगुणाद्यनधिकरणमात्रसमवेतत्वस्य गगनादिवृत्तित्वे
पि तन्न्यूनत्वानि यावंति वृत्तिमंति सत्तादीनि तद्वृत्तित्वस्य द्रव्यत्वे सत्त्वान्नातिव्याप्तिरि
ति भावः। ननु धर्मत्वं साध्यतावच्छेदकसंबंधेन संबंधित्वं वाच्यं। अन्यथा गगनादे
रपि संयोगेन संबंधितयोक्तदोषापरिहारात्। एवमभावद्वयान्यतरत्वेन समवाये
न साध्यतायां मेयत्वादिहेतौ व्यभिचारिणि तादृशगुणाद्यनधिकरणमात्रसमवेत
सम्बन्ध्येऽभावेऽवृत्तिमति तादृशान्यतरत्वस्य सत्त्वादनवच्छेदकत्वं स्यात्। तथा च संयो
गेन द्रव्यत्वस्य साध्यतायां मेयत्वादावतिव्याप्तिः। तादृशगुणत्वाद्यनधिकरणमात्र
संयुक्तस्यान्यस्य संयोगेन वृत्तिमतोऽप्रसिद्ध्या द्रव्यत्वस्यावच्छेदकत्वाभावात्॥

अवच्छेदकलक्षणव्याप्तिः –२

॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शि॰टि॰५७०

न्य

एवं च स्वधर्मावच्छिन्नमित्यत्र वृत्तित्वं साध्यतावच्छेदकताघटकसंबंधेन वाच्यं। अ
६ न्यथा वह्निसमानाधिकरणायोगोलकत्वाद्यनधिकरणमात्रवृत्तिताशून्यायोगोल
कीयवह्नौ धूमत्वस्यापि कालिकसंबंधेन सत्त्वादनवच्छेदकत्वापातात्॥ इत्थं च समवा
येन द्रव्यस्य साध्यतायां मेयत्वादिहेतौ तादृशगुणत्वानधिकरणमात्रवृत्तिताशून्ये
धर्मे सत्तादौ साध्यतावच्छेदकताघटकसमवायेन वृत्तित्वाप्रसिद्धेरवच्छेदकत्वलक्ष
णाव्याप्तिः॥ न च तादृशधर्मानाधिकरणमात्रवृत्तित्वाभाववृत्तिमत्त्वोभयाभाववत्त्वा व
त्वस्य स्वकत्वं तदवच्छेदकत्वं वाच्यं। अभावीयविशेषणतया वृत्तिमत्त्वीयसंबंधवि
शेषणत्वोभयाभावस्यानपवृत्ति सत्त्वात्॥ अन्यतरसंबंधेन तदभावस्य वानभ्युपगमा
त्। एवं सत्ताद्रव्यात्वोभयवान् जातिमत्त्वादित्यादौ वक्ष्यमाणरीत्या अतिप्रसंगश्चेत्यस्व
रसादाह॥ वस्तुतस्त्विति॥ तादृशधर्मेति॥ साध्यसमानाधिकरणधर्मेत्यर्थः॥
स्वंअवच्छेदकत्वेनाभिमतं॥ तथा च संयोगेन द्रव्यस्य साध्यतायां सत्तादिहेतौ सं
योगेन द्रव्यत्वावच्छिन्नाधिकरणतायास्तादृशगुणत्वानधिकरणमात्रवृत्तित्वात्।
द्रव्यत्वस्यानवच्छेदकत्वप्रसक्तिः। तादृशधर्मानधिकरणमात्रवृत्तित्वावच्छिन्नकत्व
मित्यत्र कोगुणान्यत्वविशिष्टसत्तावान् जातिमत्त्वादित्यादौ गुणान्यत्वविशिष्टसत्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तात्वावच्छिन्नस्य सत्त्वस्य गुणत्वानधिकरणमात्रवृत्तित्वाभावादतिप्रसंग इत्यधिकरणता
पर्यन्तानुधावनं। तादृशधर्मानधिकरणमात्रवृत्तित्वं च तादृशधर्माधिकरणावृत्तित्वमितरां
तास्य वैयर्थ्यात्॥ न च स्वावच्छिन्नाधिकरणतासाध्यतावच्छेदकसंबंधेन वाच्या। अन्यथा
धूमवान्वह्नेरित्यादौ कालिकसंबंधेन धूमत्वावच्छिन्नाधिकरणताया अयोगोलकी
व्याप्य धिकरणवृत्तित्वेन धूमत्वस्यानवच्छेदकापातात्। तथा च कालो घटवान्कालपरिमाणा
दीश्वरज्ञानं घटवन्नित्यज्ञानत्वादित्यादौ कालिकसंबंधेन विशिष्टतासंबंधेन च साध्यतायां
तादृशावच्छेदक[illegible] प्रसिद्धेरव्याप्तिरिति वाच्यं। येन येन संबंधेन स्वावच्छिन्नाधिकरणता तादृ ता
शी तेन तेन संबंधेन स्वावच्छिन्नप्रकारकज्ञानभिन्नं साध्यतावच्छेदकसंबंधेन यत्साध्यता
वच्छेदकावच्छिन्नप्रकारकज्ञानं तदवच्छिन्नसाध्यसामानाधिकरण्यस्य विवक्षितत्वात्॥
विवेचयिष्यते चेयमुपरिष्टात्। महाकालान्यत्वविशिष्टघटत्वस्येश्वरज्ञानान्यत्वविशिष्ट
घटत्वस्य च तत्र तत्रावच्छेदकत्वमित्यपि कश्चित्॥ ननु तत्तद्व्यक्त्यन्यधर्मावृत्तित्वमित्यत्र त
त्तद्व्यक्त्यन्यधर्मो पर्याप्तिवृत्तिकत्वं वाच्यं सत्ताद्रव्यत्वोभयत्वं च न सत्तापर्याप्तवृत्तिकमतो आ
हा गुणान्यत्वेति। व्यतिरेकित्वं अन्योन्याभावप्रतियोगितावच्छेदकत्वं न चैवं नाकाशाभावो व्य
तिरेकी यावद्धर्माणामधिकरणाप्रसिद्ध्या तदनधिकरणं अप्रसिद्धं प्रातिस्विकरूपेण
धर्मस्योपादाने चावच्छेदकस्यैव तथोपादानमुचितं किं व्यतिरेकित्वविशेषणेनेत्याह॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त०दि०अ०

७ वस्तुतस्त्विति ॥ तादृशाश्रयेति ॥ तथा च यावत्स्वं तद्धर्मवैयधिकरण्यावच्छेदकं यद्ध
र्मेण तद्भेदकूटस्य बोधनाय । ननु धूमसमानाधिकरणपर्वतत्वादिवैयधिकरण्यावच्छेदकम
हानसीयवह्नित्वाद्यभिन्नतया वह्नित्वादेर्न तादृशावच्छेदकभेदकूटवत्त्वमत आह ॥ या
वत्त्वाहृ इति ॥ तादृशावच्छेदकत्वस्य महानसीयत्वविशिष्टवह्नित्वे पर्याप्तत्वेपि शुद्धवह्नित्वे
तदभावः प्रतीतिबलादभ्युपेयत इति भावः । यद्यप्यवच्छेदकत्वस्य व्यासज्यवृत्तित्वे तदव
च्छिन्नभेदोपि शुद्धवह्नित्वे संभवति एकोन द्वावितिवत् । तथापि तदनभ्युपगमे नेदं न तथा
चेति । इत्थं च साधनसमानाधिकरणो धर्मो वह्निरेवेति ध्येयं । मूलस्य न्यूनतां परिहर्तुं त
दधिकरणावृत्तित्वरूपमपि वैयधिकरण्यं दूषयति । एतेनेति । संबन्धविशेषेणेति । एतन्मते
प्रागेव निरूपितं । आत्माश्रय इति । साध्यनिरूपितव्याप्तेः साध्यादिनिष्ठायाः प्रवेशाद्धा
त्माश्रयः आत्माश्रयादिति ॥ धूमवान् वह्नेरित्यादौ धूमनिरूपितधूमनिष्ठव्याप्तेर
पि लक्षणस्य न यावद्धूमनिष्ठव्याप्तिनिरूपकत्वस्य धूमनिष्ठस्यापि प्रवेशाद्धात्माश्र
यः धूमसामग्र्यादिनिष्ठस्य प्रवेशे तु [illegible]लन्योन्याश्रयः धूमसामग्र्यादिनिष्ठस्य धू
मसामग्रीनिष्ठव्याप्तिनिरूपकत्वस्यापि घटकत्वादिति । ननु यत्रोपाधिरव्याप्यवृत्तिर्ना
मास्ति कोवा तत्रोपाधिलक्षणसत्वात् । अतो पाधिकत्वलक्षणातिव्याप्तिरत आह ॥

धूमव्याप्तिनिरूपकत्वस्यापि धूमसामग्रीव्यापकत्वे
ति तोपाधिघटितत्वा । तत्र यद्धूमनिष्ठत्व ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्रेति। इदमेतद्वृक्षत्ववत् द्रव्यत्वादित्यत्रैतत्कपिसंयोगोऽव्याप्यवृत्तिनिरूपक[illegible]पाधिः। ध्व
मवान् वह्नेरित्यादौ वा आर्द्रेंधनादिर्नानाव्यक्तिकोपाधिः। अनन्त इति। व्यभिचार[illegible]काधिक
पं ३ रणानन्त्यमपि त्रस्यैवार्द्रेंधनस्य सर्वत्र संभवादिति भावः। लघ्विति। नन्स्वपदेनाव्याप्यवृ
त्तिर्नानाव्यक्तिकउपाधिः संगृह्यते। नैवं तत्र तत्र तत्कपिसंयोगवद्भिन्नत्वप्रकारकप्रमावि
शेष्यत्वाभावः।। आर्द्रेंधनवद्भिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्यार्द्रेंधनेऽप्यव्याप्यवृ
त्तिरेकउपाधिरित्यर्थः। तद्भिन्नत्वाभावस्य तदभिन्नत्वात् तत्प्रकारकप्रमाविशे
ष्यत्वस्य च विशेष्याभेदेन भिन्नत्वात् गुरुतरानुसरणं। तस्यापि आर्द्रेंधनस्यापि विशि
ष्टस्यातिरिक्तत्वे विशिष्टाभावस्य संबंधाभावात्मकत्वे वा विशेष्यस्यानन्तप्रतियोगि
त्वमत आह। द्वित्वावच्छिन्नेष्वपि संभवतीति। द्वित्वावच्छिन्नाभावस्यातिरिक्तस्य
कैश्चिदनभ्युपगमात्। कूटाभावस्यैव तादृशप्रतीतिविषयत्वाभ्युपगमादिति। साध्यसमा
नाधिकरणेति। अत्र तादृशप्रतियोगितानवच्छेदकत्वं यद्रूपेण तद्रूपेण तादृशप्रतियोगिता
वच्छेदकत्वं वाच्यं। तेन सद्धेतौ [illegible]स्येधनत्वस्य वह्निसमानाधिकरणाभावप्रतियोगि
तानवच्छेदकस्य महानसीयत्वविशिष्ट[illegible]स्येधनत्वस्य धूमसमानाधिकरणाभावप्रति
योगितावच्छेदकत्वेऽपि न क्षतिः। प्रतियोगितयोरेकसंबंधावच्छिन्नत्वादिकं पश्चाद्वक्ष्यति।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री.टि.५८.　　　भि

ऽनवस्थाऽवृत्तिविरोधित्वस्य परस्पराभाववव्याप्यत्वरूपस्य प्रवेशो तद्व्याप्तेरपि विरोधित्व
रूपप्रतियोगित्वघटकतया व्याप्यंतराणां प्रवेशादनवस्थेत्यर्थः। निरुक्तसहानवस्थायित्वघ
धिकरणावृत्तित्वरूपे व्याप्तेरप्रवेशादनवस्थाया अभावेपि दोषांतरमेव तत्रेति ध्येयं। अव्या
प्यवृत्तेरिति।। अत्रैकदेशो नावच्छेदकः। प्रागभावादेरिति। अत्रैककालो नावच्छेदकः। येन संबंधे
वेति। तत्संबंधावच्छिन्नप्रतियोगिताकाभाववति तेन संबंधेन प्रतियोगिनोऽवृत्तित्वं व्याप
दा६ त्वमित्यर्थः। तथापि तादात्म्येन वृत्तित्व[redacted]जेयत्वरूपस्याप्रसिद्ध्या कथमन्योन्याभाव
प्रतियोगिसाधारण्यमत आह। इत्थं चेति। संबंधभेदविवक्षणे चेत्यर्थः। नायं दोषः। ना
[redacted] व्याप्तिः। तद्वृत्ति समवा[redacted]यावच्छिन्नाभाववति सामान्यादौ। तत्रेति। प्रतियोगिता
वच्छेदकसंबंधेन प्रतियोगिसंबद्धं य[redacted]दधिकरणात दृष्टसभावकल्पमित्यर्थः। प्रतेनेच
नादृशप्रतियोगिसंबद्धमधिकरणं स[redacted]त्रापि व्यभिचाराधिकरणायोगोलकाद्य
न्यत्वस्योपाधित्वसंभवान्नानौपाधिकत्वलक्षणस्यातिव्याप्तिः। उपाधिलक्षणस्याप्रकृतत्वा
न्न तदव्याप्तिर्दोष इति भावः।। नित्यस्यापि विशिष्टाभावादिप्रतियोगित्वात्तदवच्छेदकानुसा
रणमावश्यकं। तथा चानित्यस्यापि नित्यसाधारणधर्मेण प्रकृतोपाधिनासंभवे[redacted]स्येवे साधा
येनाह।। नित्यसाधारणेति। तथा च तदार्द्रेंधनायोगोलकाभेदान्यतरत्वेन तदार्द्रेंधनस्याप्यु

५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शोधपत्रमिदं अष्टमपत्रस्थोर्ध्वपृष्ठस्य दशमपंक्त्या इति

रूपा

×तावदेव तत्र सत्ताभावस्यापि तल्लाभाद्व्याप्तिरिति भावः। यद्यपि सत्ताभावनिष्ठसत्ताभावप्रतियोगितायां व्याप्ति
लक्षणताद्दृशप्रतियोगिसंबंधावच्छिन्नत्वे सत्ताभावएवदेव तत्र ताद्दृशाभाववृत्तीति यावत्सम्भवायेन वह्नेरव्याप्ति
द्वे तथापि सत्पपदार्थरूपाभावप्रतियोगित्वमेव सत्तायामिति यदि ब्रूयात् तदा नोक्तव्याप्तिर्घटते इति दूषणं
तस्माद्व्यधिकरणेति। संयोगेन सत्ताभावादौ संयोगेन जातिर्न वर्ततेऽपि वैरूप्याप्रसिद्धेरव्याप्तिरित्यर्थः। रिये इत्या
इति। प्रतियोगितावच्छेदकसंबंधसामान्ये प्रतियोगिकत्वस्य तत्तद्देशकालावच्छिन्नप्रभावाधिकरणानु
योगिकत्वे चाभावस्य त्वस्य तदभावप्रतियोगित्वं। संयोगसंबंधसामान्ये च जातिप्रतियोगिकत्वज्ञाप
नाधिकरणानुयोगिकत्वे चाभावस्य तेन तत्प्रतियोगितायामव्याप्तिरिति न तत्परिहार इति। तस्या
त दोषस्याव्याप्तेः परिहारः। आकाशादेः घटाद्यभावप्रतियोगित्वस्य वारणमस्याभावाधिकरणानु
योगिकत्वे तस्याव्याप्यपादानेऽस्य च सत्ताभावइत्यभावविषयत्वस्य प्रतियोगितस्या निरुक्तिः सर्वथा भव्यस
क्तिः। अन्योन्याभावप्रतियोगिनि। तस्यान्योन्याभावविरहात्मकत्वात्। भावप्रसक्तिः। तत्त्वावच्छेद
टी के तस्येवान्योन्याभावविरहोत्वं। प्रकृतोपयोगिनी व्याप्तिलक्षणघटितत्वं सत्यर्थः। मात्रपदेनान्योन्या
भावप्रतियोगितत्वस्यावच्छेदः। तथा च इदंपदं वस्तुत्वं साध्यवन्निष्ठोभावप्रतियोगितावच्छेदकत्वाभाव
त्वरूपं प्रतियोगित्वं तदभाववत्त्वे सति साध्यवन्निष्ठो योऽभावस्तदभावत्वरूपप्रतियोगि
त्वं यत्र सद्धेतावपि रेतस्याभावो यत्र तत्रानौपाधिकत्वरूपाव्याप्तिरिति। लक्षणे। उपाधिलक्षणे वै
यर्थ्यमिति। धूमवान् वह्नेरित्यादौ धूमवत्प्रतियत्नेन तौ यथा उइ चान्योन्याभावस्तदभावत्वस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा. टि. ध.

८

८२

आद्वैधनाद्यवच्छिन्नभावेन तत्रउपाधिलक्षणसंभवेनानौपाधिकत्वरूपव्याप्तिलक्षणस्यातिव्याप्त
भावप्रयुक्तं तु अन्योन्याभावप्रतियोगितावारण[illegible] मतं तत्पदं व्यर्थं ननु तद्धूमवान् वह्नेरित्यादो
तदा द्वैधनेस्याप्युपाधित्वात् तस्य च तद्धूमसमानाधिकरण[illegible]भेदस्याभावप्रतियोगि[illegible]
दनुपाधितापत्तिरतो धूमादिकारणोपासं तत्पदं तावेकमतमाह सर्वत्र नियमे
लि. नX शोधपत्रमिदं।

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाधित्वमित्यर्थः॥ इतरथा भेदसाधारणप्रतियोगितामात्रस्य लक्षणत्वे भेदप्रतियोगितोलि
धूमवान्वह्नेरित्यादावयोगोलकान्यत्वादेरुपाधेर्धूमवन्निष्ठभेदप्रतियोगत्वादिति। तस्या। अ
त्वेताभावीयपदस्य न च सर्वत्र सर्वत्र व्यभिचाराधिकरणान्यस्य साध्यतदन्यतरस्य वा त
त्वेनोपाधित्वसंभवस्येवेति तद्धारणमफलमिति वाच्यं। इदं जन्यत्वस्य पृथिवीत्वादिसव्य
व्यभिचाराधिकरणपरमाणुभेदस्य परमाणुत्वाभावस्य वा नोपाधित्वं तस्य जन्यत्वस
ण६ मानाधिकरभेदप्रतियोगित्वात्परमाणुभिन्नत्वस्य जन्यत्वतदन्यतरस्य वा नोपाधित्वं ताद
त्रास्य परमाणावपि सत्त्वेन साधनव्यापकत्वात्। न च तादात्म्यसंबंधेन साधनाधिक
रणे परमाण्वादावसत्त्वात्साधनाव्यापकस्य मते॥ संबंधविवक्षायाः प्रकृतेऽकृतत्वा
संबंधविवक्षणे चास्यं तत्पदानुपादानस्य वस्तुतस्त्वित्यादिना स्वयमेव वक्ष्यमाणत्वात्॥
एवं तत्र परमाणववृत्तित्वादिनापि नोपाधित्वं। संबंधसामान्येन परमाणववृत्तित्वस्यै
अन्यत्ववत्तद्व्यणुकनिष्ठभेदप्रतियोगितावच्छेदकत्वात् स्वरूपसंबंधेन परमाणववृत्ति
रूपादेः परमाणावपि सत्त्वेन साधनव्यापकत्वादिति॥ केचित्तु। घटाभावान्यत्ववान्प्र
मेयत्वादित्यादौ व्यभिचारनिरूपकाधिकरणस्य घटाभावस्य यदन्यत्वं तदवच्छिन्नभे
दस्य घटाभावात्मकतया घटाभावान्यत्वस्य घटाभावान्यत्वसमानाधिकरणघटाभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०१०७७० पृ १

वप्रति[illegible]योगितावच्छेदकत्वात्॥ घटाभावान्योन्योपाधिः घटाभावत्वप्रकारकप्रमाविरहो =तदा
व्याप्यसाभाव[illegible]त्वस्य च साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वे नानुपाधित्वापत्तेरिता
भावपदस्य संसर्गाभावपरतया सार्थकत्वमित्यर्थः। अन्योन्याभावप्रतियोगिन्यव्याप्तिं नि
रस्यति। प्रतिबध्नातीति। प्रतिबंधकत्वं कारणीभूताभावप्रतियोगित्वं चेत्तदात्मत्वप्रसङ्ग
क५ तआह। प्रतिबंधकत्वं चेति। अत्र प्रतियोगितालक्षणे। प्रतियोगिज्ञानाभावज्ञानयोर्भिन्नका
लावच्छेदेनैकात्मनि यत्नेरेककालावच्छेदेनेति। एकशरीरावच्छेदेनेत्यपि बोध्यं। तेन का[illegible]
९७ यव्यूहदशायां विभिन्नशरीरावच्छेदेनैकत्र आत्मनि एककालावच्छेदेन वृत्तावपि न दोषः॥
अन्योन्याभावबुद्धिं प्रति प्रतियोगितावच्छेदकज्ञानस्यापि प्रतिबंधकत्वात्तत्रातिव्याप्तिं
निरस्यति॥ अभावपदस्य चेति॥ घटान्योन्याभावस्तु न घटत्वस्याभाव इति न तत्रातिव्या
प्तिरिति भावः। वक्ष्यमाणस्वरसादाह। वस्तुतस्त्विति। एकसंबंधेति। तथा च यत्किं
चित्संबंधावि[illegible]शेषितप्रतियोगितानवच्छेदकत्वघटितव्यापकत्वस्याप्रसिद्ध्या
व्यापकत्वदले यत्किंचित्संबंधावच्छिन्नत्वस्य प्रतियोगितायां विवक्षणेऽव्यापकत्वद
लेऽपि च तदविवक्षणे वह्निमान् धूमादित्यादौ नानौपाधिकत्वं स्यादिति। तत्र समवाया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व १

वच्छिन्नवह्निसमानाधिकरणाभावप्रतियोगितानवच्छेदकीभूतस्यापि द्रव्यत्वादेः संयो
गावच्छिन्नधूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वात् द्रव्यत्वस्योपाधित्वसंभवात् तन्नूय
प्रतियोगितासामान्यानवच्छेदकत्वघटितमेव व्यापकत्वं वाच्यं ॥ धूमवान् वह्नेरित्यादौ
अयोगोलकभेदत्वमेव धूमवन्निष्ठाभावप्रतियोगितासामान्यानवच्छेदकं संयोगावच्छि
न्नाभावप्रतियोगितायाम् अयोगोलकभेदत्वस्य गुरुतया भेदत्वस्यैवावच्छेदकत्वादिति वाच्यं
जन्यमात्रस्यैव कालोपाधितया अयोगोलकान्यभेदानधिकरणत्वावच्छिन्नकालिकसंबं
धावच्छिन्नप्रतियोगिताकायोगोलकभेदाभावस्यापि धूमवन्निष्ठतया योगोलकभेदत्वस्य
तादृशाभावप्रतियोगितावच्छेदकत्वात् । एवं पृथिवीरूपादिसाध्ये व्यभिचाराधिकरणज
लभेदादीनां कालिकसंबंधावच्छिन्नाभावस्यापि सिद्धिवपरमाणौ सत्त्वादुपाधेरप्रसिद्धि
रित्यादिकमूह्यं । तत्संबंधावच्छिन्नाया एवेति । वह्निमान् धूमादित्यादौ तु द्रव्यत्वे नातिप्र
संगः ॥ तत्र समवायावच्छिन्नधूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य द्रव्यत्वे
भावादिति भावः ॥ तद्वाच्यं । उपाधित्वं वाच्यं ॥ तथा चेति ॥ इत्यं विवक्षणे ऽन्योन्याभाव
मादाय दोषाभावादिति ॥ संध्यास्य रसस्य ॥ यदधिकरणसंबंधेनेति ॥ यस्यापि समानाधिकरणसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा०टि०५० न्वि ५

संबंध्यावच्छिन्नाभावस्थलेपि सर्वत्राभाववत्तितेन संबंधेन प्रतियोगिनोभावे मानाभाव इति
व्यधिकरणसंबंधानुसारेणमफलं॥ तथापि तेन संबंधेन प्रतियोगिमत्ताभानं यत्र तत्र तत्काला
वच्छेदेन तद्वृत्तीयाभाववत्ताज्ञानाभाव इत्यस्योनाप्रसिद्धिः संभवतीति न सर्यं तानुधावनमिति॥
अत्र सर्वत्र पंचम्यंतानि सन्चेत्यत्र हेतुत्वेनान्वयंति। स्वाभाववज्ज्ञानप्रबंधकत्वानविषयत्वमित्यत्र
त आ ५ गौरवमाह॥ स्वाभावसंबंधित्वस्येति॥ संबंधित्वस्य व्याप्तिघटितत्वेन अनौपाधिकत्वलक्ष
णेनवस्थागौरवं चेत्यत्र॥ स्वाभाववज्ज्ञानविषयत्वेति॥ उभयत्रैव प्रतियोगिनिष्ठत्वं संपादयि
तुं विशिष्यानुसरणं॥ नन्वेवं दवास्तु प्रतियोगित्वमस्तु इपि दूषयति॥ स्वाभावेत्यादावपीति॥ त
त्र षष्ठ्यर्थे। तथात्वे चित्स्यात्॥ प्रतियोगित्वोचित्स्यात्॥ प्रकारांतरेणापि प्रतियोगितायाः प्र
वेशं दर्शयति॥ अभावत्वेति॥ अभावत्वं यद्यपि षट्कान्यत्वाभाववत्त्वं॥ प्रतिबंधकत्वं एक
कालावच्छेदेन एकत्र वर्तमानस्य प्रतियोगितावोऽभावः॥ न प्रतियोगितानिवर्वनानुयो
गस्तदु च स्थः न तथाविधेति॥ अभावत्वादिप्रकारे स्यपदः॥ विनेति॥ तत्राप्यभावत्वस्य प्रवेशात्त
स्य प्रतियोगित्वाघटितस्य दुर्वेयत्वादितिभावः॥ यत्साध्यस्येत्यत्र मूले कर्मधारयात्रमे व्याप्तौ
तुव्यत्तित्वाभोत्तः षष्ठीसमासापि प्रायेणाह॥ यत्समानाधिकरणेति॥ पावत्साध्यनाव्यापक

ली

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मव्यापकं यत्साध्यस्य तत्त्वं यावत्साध्यव्यापकं व्यापकं वा यस्य तत्त्वमित्यनौपाधिकत्वघटकं क्रमेण
परिष्करोति॥ यत्समानाधिकरणात्यन्ताभावेति॥ धूमवान् वह्नेरित्यत्र तादृशप्रतियोगितावच्छेदकस्य
घटत्वादेर्धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाद्व्याप्तिरिति॥ एवं तत्रैव धूमसमानाधिक
रणाभावप्रतियोगितानवच्छेदकस्यापि द्रव्यत्वस्यार्द्रेन्धनवह्निसमानाधिकरणाभावप्रतियोगितानवच्छेदक
त्वादुक्तरीत्यापि यावदिति॥ नोक्तदोषः॥ न मूलोक्तदोषः॥ एकसंबंधस्य तत्तत्संबंधपर्यवसानेनान
नुगमात्। तत्र च विशेषणताविशेषस्यापि निवेशे तस्यैव विशिष्यप्रवेशौचित्यमत आह॥ विशेषणते
ति॥ प्रथमे संबंधविशेषाप्रवेशे दूषणमाह॥ प्रतियोगितावच्छेदकमात्रस्यैवेति। मात्रपदं कृत्स्नार्थकं॥ धूमवान् वह्नेरित्यादौ
तथा च हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य सुतरां तथात्वमिति धूमवान् वह्नेरित्यादौ साध्यसमानाधिकरणा
अतिव्याप्तिरिति भावः॥ धूमवान् वह्नेरित्यादौ अयोगोलकभेदत्वादीनां यथा साध्यसमानाधिकरणात्यन्ताजातेः साध्य
भावप्रतियोगितावच्छेदकत्वं तथा प्रागेव दर्शितं॥ न चेयं जातिर्मेयत्वादित्यत्र तादृश्येन जातेः साध्यव
तायां व्यभिचारिणि मेयत्ववन्निष्ठभेदप्रतियोगितावच्छेदकस्य जातित्वस्य केनापि संबंधेन साध्याभावप्रतिये
न्निष्ठाभावप्रतियोगितावच्छेदकत्वाभावात्कथमेष नियमः॥ समवायाद्यवच्छिन्नजात्यभावप्रतियोगितारभा
गितायां नित्यत्वादेर्वैयर्थ्येन समवेतत्वस्यैवावच्छेदकत्वादिति वाच्यं॥ विशेष्यतासंबंधेन जातेरभा
वस्य नित्यगुणादिविशेष्यकज्ञानेपि सत्त्वेन तत्र नित्यानेकसमवेतत्वरूपजातित्वस्यैव प्रतियोगिता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री०दि०५१०

२२ त्वावच्छेदकत्वात्। तदभावस्य च साध्यवत्यपि सत्त्वादिति॥ साध्यसमानाधिकरणेत्यत्र साध्यपदं
धूमादिरूपसाध्यपरमित्यपि कश्चित्। द्वितीयलक्षणे संबंधविवक्षायाः फलमाह॥ एकसंबंधेति।
सामान्यतस्तादृशाभावप्रतियोगितावच्छेदकत्वे प्रसिद्धिरतो यत्किंचित्संबंधावच्छिन्नत्वस्य प्रतियो
गितायां निवेशे संबंधैक्याविवक्षणे दोष इति स्फुटयितुं एकसंबंधावच्छिन्नत्वेन प्रतियोगिता निर्दि
ष्टा॥ उक्तविवक्षणे लक्षणद्वयस्यैवातिप्रसंगाभावं दर्शयति॥ व्यभिचारिणी चेति॥ विशेषणेति॥ वि
शेषणताविशेषस्यात्र प्रमाविषयत्वीयो व्यतः। संबंधविशेषप्रवेशे लाघवात्कल्पांतरमाह॥ वस्तु
तस्त्विति॥ यदिति॥ यत्संदेहे तत्पुरं यत्कर्मावच्छिन्नेति॥ साध्यतावच्छेदकावच्छिन्ने सप्तम्यः। अत्र धूम
वान्वह्नेरित्यादौ वह्निमन्निष्ठभेदप्रतियोगितावच्छेदकस्यायोगोलकान्यत्वस्य धूमवत्त्वप्रकारक
प्रमाविशेष्यत्वादेर्वा विवक्षितत्वात् तद्धटितान्योन्याभावप्रतियोगितावच्छेदकत्वात् प्रतियोगितावच्छेदकसं
बंधाप्रवेशे प्यवच्छेदकतावच्छेदकसंबंधैक्यविवक्षणमावश्यकं। तथा च लाघवं। तथा संला भा
वच्छिन्नत्वलक्षणे प्रतियोगितावच्छेदकसंबंधैक्यविवक्षणेऽपि अवच्छेदकता संबंधेनैव घटकसंबंधे
क्यविवक्षणमावश्यकं॥ अन्यथा विशेषणताविशेषावच्छिन्नवह्निमन्निष्ठाभावप्रतियोगितावच्छेदकस्यायोगोलकान्यत्वस्य विषयितया तद्धटितान्योन्याभावस्य तादृशविशेषणताविशेषाव
च्छेदकस्यायोगोलकान्यत्वस्य विषयितया तद्धटितान्योन्याभावस्य तादृशविशेषणतयाज्ञानाभा
वच्छिन्नप्रतियोगितावच्छेदकत्वादतिव्याप्तिः स्यादिति वाच्यं॥ अभावीयविशेषणतया ज्ञानाभा
वस्य व्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकाभावत्वेन केवलान्वयितया तत्प्रतियोगितायां लाघ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाह्नेद्रव्यत्वादेरेव विषयितया ऽवच्छेदकत्वेनायोगोलकभेदस्य स्वविशिष्टस्यानवच्छेदकतयातिप्रसंगा
भावेनावच्छेदकतासंबंधेन स्वस्य तत्राविवक्षणात् तस्माद्वह्निमत्त्व इत्यादिपाठः ॥ काल्पनिकः अत एव
प्राचीनपुस्तकेषु तोलित एवायमिति विवेचनम्। यावत्स्वसाध्यविशेषणतामत्र मंतव्यमिति व्यभिचारी स्यात्र
७।५ कर्मधारयपक्षमंचविराकर्त्तुमाह यावत्ताविति। तथा च साध्यं यावत्तामव्यभिचारितेषामव्यभि
चारित्वं व्याप्तिरित्यर्थः। दूषितमित्यत्र हेतुं पूरयति। केवलान्वयिन्यव्याप्तेरिति ॥ ननु साध्याव्यभिचा
रित्वस्य तत्त्वे केवलान्वयिन्यव्याप्तिरेव दोष इति प्रकृतलक्षणमेव समापनं आह ॥ सा च प्रकृतेपीति के
वलान्वयिसाध्यं यस्याव्यभिचारितस्याप्रसिद्धेरिति भावः। एतल्लक्षणे कार्त्स्न्यस्य विशेषणः किंचि
न्निष्कृत्वे नानुपादानात् तत्कार्त्स्न्यस्याधिकरणविकल्पपूर्वकं दोषदानपरतया ऽन्तरग्रंथं योजयितुं मू
लस्य न्यूनतां परिहर्तुमाह ॥ कार्त्स्न्यमित्यादि ॥ साध्यान्वयस्य सादिद्वयं च मूलस्य न्यूनतापरिहाराय
सकलछप्रम स्वबंधस्य वन्हावभावादिति ग्रंथदर्शनात् व्याप्तेः साध्यनिष्ठत्वं दर्शयितुं प्रथमे
विकल्पयति आद्ये इति ॥ स्वातंत्र्येणादोषमाह ॥ व्यापकेति ॥ ननु साध्यविशिष्टसामानाधिकरण्यनिरूप
कत्वं यद्धर्मव्यापकं तद्धर्मवत्त्वं व्याप्तिरतो नोक्तदोष इत्यत आह पृथिवीत्वव्यापकेति ॥ पृथिवीत्ववन्निष्ठा
न्योन्याभावप्रतियोगितानवच्छेदकत्वमिह तद्व्यापकत्वं इदं च विषयितया ज्ञाननिष्ठतया सर्वस्यैव तत्
द्वाज्ञानभेदप्रतियोगितावच्छेदकत्वात् तदनवच्छेदकाप्रसिद्धिरतः समवायेन यावच्छेदकतानतदभा
वरूपेताद्दशप्रतियोगितानवच्छेदकत्वं वाच्यम् ॥ तथा चासमवेतस्य गगनादेरेवतादृशप्रतियोगितान

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा०टी० ५७०

वच्छेदकत्वात्। तत्र पृथिवीत्वसामानाधिकरण्यनिरूपकत्वाभावान्नातिव्याप्तिः स्यादतस्तत्सं
५२ पन्नये गगनादिवारणाय आसीतीति समवेतपरं॥ प्रमेयत्वादेरेकव्यक्तिकत्वेन कात्स्न्याभावादेवंविधहेतुकर
णे॥ अतएव उक्तातिव्याप्तेरेवं द्वितीयविकल्पस्य मूलोक्तानुवादं सार्थकयति। अथ धर्मिण्यानेति॥ एकहे
तुव्यक्तिकाव्याप्तेः पूर्वमुक्तत्वात् तत्र तत्परामर्शकत्वेऽसंगतिरतस्तत्परामर्शीयं दर्शयति॥ एक[illegible]व्यक्ति
[illegible]के साध्यकव्याप्तेरेवेति। पूरयति समव्याप्तेश्चेति॥ तदेव दर्शयति संव्यापरिमाणयोरित्यादिना।
५०८ सेव्यापतिमाणोरेकस्य साध्यत्वेऽन्यस्य साधनत्वे इदं॥ तदभावादित्यस्य च तत्र[illegible]स्यार्थं विग्रहं चादर्श
यति॥ सकलेति। ननु हेतुनिष्ठसामानाधिकरण्यप्रतियोगित्वं यत्कर्म व्यापकं तत्कर्मावच्छिन्नसामाना
धिकरण्यं हेतौ व्याप्तिरतो नोक्तदोष इत्यत आह भावाच्चेति॥ साध्यस्य कार्त्स्न्यं वह्नित्वं शब्दवानित्यने
कव्यक्तिसाध्यतारूपादिसाध्यतायां कृत्स्नरूपाधिकरणत्वस्य यथाश्रुतस्यार्थस्याप्रसिद्ध्यान्नदुपे
क्षिते। तृतीयचतुर्थयोरर्थपरिष्कारं दूषणं चाह॥ तृतीय इति॥ एकमात्रवृत्तिसाध्यकेपि साध्यस
मानाधिकरणानां बहूनां संभवाच्चतुर्थे तद्दोषस्यासंभवात् यथासंभवमिति। वह्न्याद्यव्याप्त्यादिदोष
स्तूभयोरेवेति॥ अतिव्याप्तिश्चेति॥ साध्यसमानाधिकरणधर्माणां प्रातिस्विकरूपेण सामानाधिक
रण्यविवक्षणे वह्न्यादौ साध्ये सत्त्वादेरतिव्याप्तिरिति। यथाश्रुतेन तु तद्वह्निसाध्यक[illegible]सत्त्वेति व्या
प्तिरप्रसिद्धिश्च वह्न्यादिसाध्यकसद्धेताविति॥ अर्थपरिष्कारेति॥ साधनाश्रयस्य कार्त्स्न्यं विवक्ष
णो कृत्स्न[illegible]साधनाश्रयाश्रितत्वं साध्ये लभ्यते। तथा च न व्याप्तेर्हेतुवृत्तित्वमतस्तस्याहेतुनिष्ठ

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

।त्वसंपादनार्थं परिष्कारः॥ एवं साधनसमानाधिकरणेत्यत्रापि परिष्कारः। स्वयं दूषणमाह॥ एकमा
त्रवृत्तीति। तथैवार्थपरिष्कारस्य पूर्वकमेव। प्रत्येकनिरूपितसामानाधिकरण्यविवक्षणे मूलोक्त
प्रसिद्ध्यभावाद्दूषणांतरमाह॥ तादृशानामिति। साधनसमानाधिकरणानां न कुत्रापीति॥ पर्वतीयवन्हे
महानसत्वसामानाधिकरण्याभावादेवमन्यत्रापीति भावः॥ यद्धर्मावच्छिन्नेति॥ साध्यतावच्छेदकावच्छि
न्नेत्यर्थः। तेन गुणान्यत्वविशिष्टसत्तावान् जातेरित्यादौ जातिसामानाधिकरण्यं प्रतिसत्तात्वे केसाध्य।
सामानाधिकरण्यव्यापकत्वेपि न दोषः। इतोपीति। तथा च वक्ष्यमाणलघुत्वापेक्षया गौरवमेव प्रकृत।
लक्षणे दोष इति भावः॥ साध्यं विनेति॥ अत्र विनाशब्दार्थोऽभाववान्। विनाभावे इत्यत्र समासस्य सप्त
मीतत्पुरुषः ततो नञ्समासः। पूर्वोक्ता व्यभिचारितत्वस्य साध्याभाववद्वृत्तित्वस्य साध्याभाववद्वृ
त्तिभिन्नत्वरूपत्वान्नेतन्न पौनरुक्त्यं सत्तासाध्यके समवायेन हेतौ हेतुतावच्छेदकसमवायेन साध्या
भाववतिवृत्तेरप्रसिद्ध्याऽव्याप्तेराह॥ साध्यमित्यादि॥ अत्र तु विनेति सप्तम्यंतं विनार्थश्चाभावः सप्तम्या
वच्छेदकत्वसम्बन्धेन वृत्तित्वरूपं प्रत्याय्यते। तथा च विनाभावः साध्याभावव्यापकीभूताभावः। अविनेत्य
स्य नञा पुनस्तस्याभावः प्रत्याय्यते स एव प्रतियोगित्वमिति। भावप्रधाननिर्देशात् तादृशाभावप्रति
योगित्वस्य लाभ इति॥ कार्यकारणभावात्मकसंबंधस्य व्याप्तित्वाभावादाह॥ सामानाधिकरण्य
मिति। व्यभिचारिसंबंधस्य। व्यभिचारिहेतुनिष्ठसमानाधिकरणस्य केनचिदिति मूलस्यार्था
संगतेः किंचिद्रूपावच्छिन्नसाध्यपरतया व्याचष्टे। किंचिद्रूपावच्छिन्नेति। तदेवाह॥ धूमादेरपीति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दी॰टि॰प्र॰

८१

९३

व्यभिचाराग्रहे सति चाव्यभिचाराग्रहेऽनुमित्यानुत्पादोऽसिद्धिवत्स्य तस्य व्यतिरेकोप्युक्तः॥ अनु
भवे विप्रतिपन्नं प्रत्याह॥ हेत्वन्तर इति॥ तद्धेतुकानुमितौ तद्धेतुकव्यभिचाराग्रहो हेतुरत सामेवं
ति॥ द्रव्यत्वरूपेण धूमे व्यभिचारग्रहेपि धूमत्वावच्छिन्नधूमहेतुकानुमितेरुदयादिति भावः॥
येन रूपेण पक्षधर्मताधीस्तेन रूपेण व्यभिचारज्ञानाभावो हेतुर्वाच्य इत्यतो हेतुतावच्छेदकाग्रहे
पीति। वह्निसमानाधिकरणवानित्यत्र हेतुतावच्छेदकस्य धूमत्वादेरग्रहादित्यर्थः॥ ननु वह्निस
मानाधिकरणवानित्यादौ सामानाधिकरण्यप्रकारकमेव पक्षधर्मताज्ञानं तेन रूपेण व्यभिचा
रज्ञानाभावस्य कारणं॥ वह्निसमानाधिकरणवह्निमदन्यावृत्तिमानित्यादौ तु वह्निमदन्याव
त्तित्वप्रकारेण व्यभिचारज्ञानाप्रसिद्ध्या तेन रूपेण सामानाधिकरण्यप्रकारकपक्षधर्मता
ज्ञानमेव कारणं न व्यभिचारग्रहाभावस्तत्र आह विवदन्ते चेति॥ परामर्शे चैतत्स्फुटीभविष्य
ति॥ ननु सामानाधिकरण्यज्ञानस्य कारणत्ववादिमते इदं स्यादत आह॥ व्यभिचारज्ञानेति॥
उचितमिति। व्यभिचारज्ञानाभावस्य कारणतायां स्वातन्त्र्येण ज्ञानाभावस्य हेतुत्वेन प्रवेशो का
रणांतरकल्पने च गौरवात्। कारणीभूतसामानाधिकरण्यज्ञाने विषयतया व्यभिचारस्यावच्छ
८३ दकत्वमुचितमित्यर्थः॥ गौरवमिति॥ व्यभिचाराप्रकारके सत्त्व यद्व्यभिचारप्रकारकं तत्त्वेन हे
तुत्वापेक्षया व्यभिचारप्रकारकज्ञानाभावस्य हेतुत्वे लाघवादिति भावः॥ न त्वेवेति॥ व्यभिचारा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रकारकमव्यभिचारप्रकारकं ज्ञानमव्यभिचारनिश्चयः। तस्य भ्रमत्वं व्यभिचारवत्सव्यभिचारप्रकारक
त्वं व्यभिचारज्ञानस्य भ्रमत्वं व्यभिचाराभाववति व्यभिचारप्रकारकत्वात् तस्य निश्चयो व्यभिचाराभाव
वति व्यभिचारप्रकारकत्वाभावात् प्रकारकत्वे सति व्यभिचाराभाववति व्यभिचारप्रकारकत्वप्रकारक
ग्र. चा ५ ज्ञानं। तथा च व्यभिचारवति अव्यभिचारप्रकारकत्वप्रकारकज्ञानानास्कंदित व्यभिचाराप्रकारकअव्य
भिचारप्रकारकज्ञानत्वमपेक्ष्य व्यभिचाराभाववति व्यभिचारप्रकारकत्वाभावात्प्रकारक व्यभि
चाराभाववति व्यभिचारप्रकारकत्वप्रकारज्ञानानास्कंदित व्यभिचारप्रकारकज्ञानत्वेऽति
गौरवात् तदवच्छिन्नाभावे हेतुत्वे सुतरां गौरवादिति भावः॥ न च यत्र विषयविशेषे व्यभिचारज्ञा
ने भ्रमत्वनिश्चयो न जातस्तत्र लाघवाद् व्यभिचारज्ञानाभावस्यैव हेतुत्वं स्यादिति वाच्यं॥ तथाभ्यु
पगंतुरिष्टत्वात्॥ वक्ष्यमाणैकविधेति॥ अन्योन्याभावगर्भेत्यर्थः॥ यदि लाघवादेकविधा व्यभि
चारज्ञानस्य कारणत्वं तदान्याहत्य व्यभिचारज्ञानस्यानुमितौ व्याप्तिज्ञाने वा स्यात् त्वेन प्रतिबं
धकत्वं कल्प्यं तथा चातिगौरवं अन्याहत्य व्यभिचारज्ञानस्य व्याप्तिज्ञानाप्रतिबंधकत्वे तु ममा
पि लघुतरमेकविधमेव व्यभिचारज्ञानं प्रबंधकमस्त्विति स्वरस आहुरित्यनेन सूचितः॥ नन्व
व्यभिचारितहेतुमत्वे पक्षस्य साध्यवत्त्वावगाहकत्वं तत्त्वेन हेतुतायां बीजं॥ तच्च सामानाधिकर हेतो
ण्य विशिष्टहेतुमत्त्वेपीति लाघवात् ज्ञानमेव हेतुरस्तु इत्याशंक्य निराचष्टे सामानाधिकर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दी॰ट॰प॰ तदीयरा हन्तित्वविशिष्टवत्तानिर्णयप्रतिबद्धर्मितावच्छेदकविशिष्टधर्मिणि २

१४

पक्षे साध्यग्रहं विनेति। पर्वतो वह्निमान् न वेति संशयोत्तरं वह्निमद्वृत्तित्वविशिष्टधूमवान् पर्वत इति निर्णय
स्यानुत्पत्तेस्तद्धर्मितावच्छेदकविशिष्टधर्मिणि तद्वत्तानिर्णयस्य हेतुत्वं अनायत्या कल्प्यत इति भावः॥ केवला
न्वयिसाध्यसामानाधिकरण्यस्य केवलान्वयित्वविशिष्टसाध्यसामानाधिकरण्यस्य वा ज्ञानं हेतुरिति
मतं दूषयति। केवलान्वयित्वस्येति॥ तद्ग्रहः केवलान्वयित्वग्रहः। तच्च केवलान्वयित्वं च वृत्तिमत्व
प्रवेशे गौरवादन्योन्याभावघटितता व्यभिचारनिश्चयस्य कारणत्वनिर्वाहायान्योन्याभावघटि
तं केवलान्वयित्वमाह॥ अन्योन्याभावेति॥ कालिकत्वयावाच्यत्वादिमतो भेदस्य प्रतियोगितायां वा
व्याप्यादेरवच्छेदकत्वेन स्वरूपसंबन्धविशेषेणावच्छेदकत्वं वक्तव्यमिति न दोषः॥ सर्वसाधारण्या
या केवलान्वयिव्यतिरेकिसाधारण्याय॥ साधनवत इति वृत्तेर्विशेषणं॥ तद्वृत्तित्वस्य साधन
वद्वृत्तित्वस्य इदमन्योन्याभावविशेषणं। तथा च साधनवत्त्वस्य संसर्गताभा[illegible]वा प्रतियोगित्वंसा
धनवद्वृत्त्यन्योन्याभावप्रतियोगितानवच्छेदकत्वं वा उभयसाधारणं साध्ये विशेषणमस्तु॥ किंच
पृथक्कारणत्वकल्पने नेति भावः॥ एकस्यैव वाच्यत्वस्य केवलान्वयित्वज्ञानकाले व्यतिरेकित्व
प्रमकाले च पृथक्कार्यकारणभावकल्पने गौरवादेकएव कार्यकारणभावः तत्पले लाघवादिति भा
वः॥ शेषमिति लाघवात्साध्यवदन्यावृत्तित्वमेवानुमितिकारणं केवलान्वयित्वज्ञानकाले च
नानुमितिरित्यादिकमित्यर्थः॥ यथाश्रुते [illegible] वह्नित्वावच्छिन्नवह्नेरेव तत्तद्वह्नित्वावच्छिन्नसाद

इति पूर्वपक्षग्रंथः समाप्तः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रि २

व्याप्तिरतो न गुरुव्यत्यासाभिप्रायेणाह ॥ प्रतियोगितानवच्छेदक इति ॥ वह्निमान् धूमादित्यादौ वह्न्यभाव
दिव्यक्तिरूपत्वेन तत्तद्वह्निव्यावच्छिन्न सामानाधिकरण्यस्य पृथिवीवान् सत्त्वविशिष्टगंधवत्त्व द्रव्यत्वव
गंधादित्यादौ गुरुद्रव्यत्व सामानाधिकरण्यस्य प्रकृतसाध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्ति
त्वाभावादाह ॥ तद्धर्मावच्छिन्नेनेति ॥ तद्रूपविशिष्टेत्यादिना लघ्यनिर्देशाः द्रव्यत्वरूपेण धूमा
देर्व्याप्यत्ववारणाय तद्रूपविशिष्ट[illegible]स्येति ॥ तत्रैव वह्नेः सत्त्व[illegible] इत्यादिना व्यापकत्ववारणाय
तद्धर्मावच्छिन्नेनेति ॥ माहानसीयवह्निसामानाधिकरण्यस्यैव निखिलधूमवन्न्यादिव्याप्तित्वमिति
व्याप्तेः सामान्यरूपतालाभाय यावदिति एवो क्रियेत न केनापीति च ॥ ननु दंडिमान् दंडिसंयोगादित्य
त्र साध्यतावच्छेदकस्य तत्तद्दंडस्य नाद्दंशाभावप्रतियोगितानवच्छेदकत्वदुर्घट ॥ चालनीयन्यायेन
तत्तद्दंडावच्छिन्नाभावस्य दंडिसंयोगाधिकरणे सत्त्वात् ॥ न च न दंडी नास्तीत्यादौ तत्त्वाविशिष्टद
ड एव प्रतियोगितावच्छेदको न तु शुक्लदंडः दंडी नास्तीत्यप्रतीतेरिवाच्य ॥ न दंडी नास्तीत्यादौ तत्त्वेनो
पलक्षित न शुक्लदंड एव प्रतियोगितावच्छेदकतया भासते न तु तत्त्वमपि तद्विशेषणतया । यत्र शुक्ल
स्य विशेष्यस्यातिप्रसक्तत्वं तत्रैव तद्विशेषणतया तद्विशेषणस्यावच्छेदकत्वं प्रमाणेन गृह्यते ॥
यथा गुणान्यत्वविशिष्टसत्तावच्छेदे शुक्लसत्ताया अतिप्रसक्तत्वात् सामानाधिकरण्ये न तद्वि
शेषणस्य गुणान्यत्वस्य । किंच पृथिवी ✱ सव्याप्यजातिमत्त्वरूपपृथिव्यादि स्वत्र समवायेन

स्या

31

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शि.टि.भ.
१५

हेतुतायां साध्यतायां तादृशघटत्वपटत्वादिजातेः प्रत्येकं व्यधिकरणतं तत्कपालनिष्ठाभावप्रतियोगिता
वच्छेदकत्वाद्व्याप्तिः॥ तादृशजातीनां स्वरूपत एवावच्छेदकत्वात्तदुक्तौ प्रतीकास्वरसादत आह॥ दण्डवा
नविति॥ दण्डिसंयोगाधिकरणनिष्ठदण्डाभावप्रतियोगितायां दण्डत्वस्य साक्षात्संबंधेन समवायात्मके
नैवावच्छेदकत्वादत आह॥ परंपरासंबन्धेनेति॥ तथा च दण्डत्वस्य दण्डिनि स्वाश्रयसंयोगरूपः प
रंपरासंबंधः साध्यतावच्छेदकतानियामकस्तेन संबंधेन यदवच्छेदकत्वाभावो दण्डत्वे वर्त्तत एवे
ति नातिव्याप्तिः॥ इत्थं च दण्डत्वस्योक्तसंबंधेन दण्डिनि प्रकारतया भानात् दण्डवानित्येवानुमित्या
कारः॥ दण्डिमानित्यनुमितिस्तु तत्तद्व्यक्तित्वादिना हेतुस्थले दण्डत्वसामानाधिकरण्येनानवच्छेद
ता ७ कत्वज्ञानस्य प्रमात्वात् तादृशप्रमाजन्या॥ दण्डिसंयोगहेतुस्थले त्वनवच्छेदकत्वभ्रमजन्यैवेति
मंतव्यं॥ यदि विशेषदर्शिनामपि दण्डिसंयोगादिहेतुस्थले दण्डिमानित्याकारकानुमितिरनुभवसि
द्धा तदा हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छेदकं यद्रूपं तद्भिन्नरूपावच्छिन्नसामाना
धिकरण्यं दण्ड्यादिसाध्यकस्थलेऽव्याप्तिवारणायेति विशिष्यैव साध्यसाधनभेदेन लक्षणं वाच्यं॥
शब्दैक्यमात्रस्यानुपयोगादित्यादिति॥ एतमर्थं वह्न्यादौ न दण्डादौ तत्संयोगादौ च साध्ये सर्वत्र साक्षा
त्संबंधरूपावानुगमकं वह्नित्वादिकमेव साध्यतावच्छेदकमित्याह दीधितिकृदेव स्फुटीकरि
ष्यति॥ केचित्तु॥ यत्र व्यापकतानां तेन दण्डत्वं निरुक्तसंबंधेन साक्षादेव साध्यांशे प्रकारीभूय भा

ग न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भासते तत्रानुमितावपि तथैव तस्य भानमिति दंडवानित्येवानुमित्याकारः॥ यत्र तु साध्यांशे विशेषण
तावच्छेदकीभूतस्य दंडत्वस्य व्यापकतांशे न भानं तत्रानुमितावपि तथैवेति दंडत्वादव्यापकतावच्छे
से दकेऽपि दंडिमानित्यनुमित्याकारो न विरुध्यते॥ न च दंडीति ज्ञाने दंडत्वस्य दंडिन्यप्रकारकत्वात् कथं
तेन संबंधेन तत्रानवच्छेदकत्वभानमिति वाच्यं॥ दंडः प्रमेय इति ज्ञाने दंडत्वविशिष्टे प्रमेयत्वान्वये
दंडत्वांशे प्रमेयत्वान्वयवत् दंडीति ज्ञाने दंडत्वविशिष्टस्य दंडीति प्रकारत्वे दंडत्वस्यापि प्रकारत्वा
त्॥ तयोरियान् परं भेदः तत्र दंडत्वं दंडविशेषणतापन्नमेव दंडप्रकारः न तु स्वातंत्र्येणेति नानु
मितौ दंडवानित्याकारस्स्यात्॥ यद्रूपविशिष्टे सस्य फलमाह॥ इत्यंशेऽपि अत्र संबंधात्॥ तथा
च भूणादौ विशिष्टसत्तासंबंधाभावादित्यर्थः॥ सामानाधिकरण्यघटितो व्याप्तित्वे एकैव हि सा
२८ व्याप्तिरित्यनन्तग्रंथविरोधमुपपादयति॥ सामानाधिकरण्येति॥ निरूपकतावच्छेदकत्वस्य तादृशा
प्रतियोगितानवच्छेदकत्वे सति सामानाधिकरण्यप्रतियोगिनिरूपकरीत्यभासमानस्य। अधि
करणतावच्छेदकस्य। सामानाधिकरण्यानतिप्रसक्तस्य तथात्वे केवलेत्यादिग्रंथस्य एकनिरूपक
तावच्छेदकेऽधिकरणतावच्छेदकावच्छिन्नेति लक्षणयार्थ इति भावः॥ ननु सामान्यलक्षणान
भ्युपगमे महानसीयधूमनिष्ठवह्निसामानाधिकरण्यस्य पर्वतीयधूमादाववृत्तेः पर्वतीयधूम
निष्ठवह्निसामानाधिकरण्यस्य पर्वतीयवह्नेस्सन्निकर्षेण ग्रहायोगात् कथं व्याप्तिधीरित्यादे

कि ३

33

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षेपेरकैवही स्यादिग्रंथावतारः तत्र च निरूपकतावच्छेदकादेरैक्यपितदाक्षेपस्यानुद्धारादसंगतिः॥
न च स्वसमानाधिकरण धूमत्वरूपपरंपरासंबंधेन महानसीयधूमनिष्ठवह्निसामानाधि
करण्यस्य पर्वतीयधूमे भानमिति वाच्यं॥ साक्षात्संबंधेन व्याप्तिप्रकारकज्ञानस्यानुमितिहेतुत्वा
दत आह॥ वस्तुत इति॥ रासभादीति॥ न च तद्रूपविशिष्टस्यव्याप्त्यादिकरणादेव रासभेन क्षतिरि
ति वाच्यं॥ वह्निमान् महानसवृत्तित्वविशिष्टोदित्यादौ तावता रासभो वह्निव्याप्य इति व्यवहारा
भावोपपादनेपि धूमव्यापकवह्निसमानाधिकरणरासभवानिति ज्ञानस्यापि पक्षधर्मताज्ञेया
प्तिकारकतया ततोनुमित्यापत्तेर्वारयितुमशक्यत्वादिति॥ धूमत्वादिमतीति॥ अत्र धूमत्वस्य
सामानाधिकरण्यसंबंधेन वह्निसामानाधिकरण्यस्वरूपतः प्रकारत्वे धूमत्वविशिष्टत्वाद्
रासामानाधिकरण्यमेव व्याप्तिरितरथा तु धूमीयं तादृशसामानाधिकरण्यव्याप्तिः॥ तस्य
कारकपक्षधर्मताज्ञानमनुमितिहेतुः॥ तद्वतीति सामानाधिकरण्यवतीत्यर्थः॥ तथा च सामाना
धिकरण्यविशिष्टधूमत्वं व्याप्तिस्तत्प्रकारकज्ञानं च धूमो वह्निसमानाधिकरण इति ज्ञानोत्त
रकालीनं॥ तत्रापि धूमत्वस्य स्वरूपत एव भानं न तु धूमत्वत्वेनेति न गौरवं॥ न च हेतुनिष्ठ
सामानाधिकरण्ये नैव रासभादिवारणे हेतुतावच्छेदकवतीत्यस्याप्रवेशात्कथं विनिगमनावि
रह इति वाच्यं॥ वह्निमान् महानसवृत्तित्वविशिष्टादित्यादौ महानसवृत्तित्वविशिष्टत्वेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रासभस्याऽपि हेतुत्वात्तद्धारणासंभवादिति॥ अभिन्नैवेति॥ तथा च एकैवेतीति ग्रंथस्तदभिप्रायक एवे
तिनावः॥ अयं कपिसंयोगीति॥ कपिसंयोगीतिपदस्य साध्यवाचकपदत्वमाविष्कर्तुमयमिति
पक्षवाचकपदस्य निर्देशः॥ एवमग्रेऽन्यत्रापीति तत्॥ असामानाधिकरण्यात्॥ द्रव्ये कथं संयोगसामा
न्याभाव इत्यत आह॥ संयोगस्येति॥ तर्हि संयोगसामान्याभावस्य कथं नाध्यक्षतेत्यत आह॥ व
चे तत्रेति॥ तत्र वृक्षे अतीन्द्रियस्येति॥ तथा च तयोर्योग्यानुपलब्धिरिति भावः॥ ननु प्रतियोगितावच्छे
दकावच्छिन्नयत्किंचित्प्रतियोगियोग्यत्वेव संसर्गाभावप्रत्यक्षतंत्रमिति मतेन तथा स्यादत आह॥ ग
परितइति॥ वृक्षे उद्भूतरूपवत्महन्मात्रसमवेतसंयोगसामान्याभावप्रत्यक्षत्वमपि परितः प्रति
योग्युपलब्धेर्दोषादेवेत्यत आह॥ प्रतीत इति कश्चित्॥ योयदिवेति॥ योयत्कर्मव्याप्यधर्मावच्छिन्न
प्रतियोगिताकयावदभाववान्न तु सत्तत्कर्मावच्छिन्नाभाववानित्यर्थः॥ एकेति॥ विभिन्नावच्छेद
व८ कानवच्छिन्नयावद्विशेषाभाववत्त्वस्य फलतोऽनवच्छिन्नवृत्तिकयावद्विशेषाभाववत्त्वस्यार्थः॥
तेन गुणे संयोगाभावस्य अवच्छेदकविरहेऽपि नाप्रसिद्धिः॥ एतेन॥ उक्तोपाधिना॥ अभावत्वादि
त्ये च हेतुर्वाच्यस्तत्राह॥ अप्रयोजकत्वादिति॥ निर्गुणत्वं च गुणावच्छिन्नत्वं॥ आदिना निःक्रियत्व
परिग्रहः॥ अत्र वृक्षो न संयोगसामान्याभाववान् निर्गुणत्वाभावादिति न प्रसत्वनुमानं॥ संयो द
गसामान्याभावस्य संयोगरूपत्वेन सिद्धसाधनत्वात् किंतु संयोगसामान्याभावो न वृत्तिः॥ नि
र्गुणत्वव्याप्यस्यैवत्वादित्यनुमानात्॥ वृक्षवृत्तित्वाभावसिद्धिरित्येयं॥ ननु पक्ष[illegible]बाधिक

भा०या०२ भा० ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या॰ गु॰ टि॰ प॰ २०
२८

रणे प्रतियोगिनो वृत्तौ यदनवच्छेदकं तत्तदभावावच्छेदकं गुणाभावस्य न गुणाधिकरणे इत्यतो यथेति ॥ प्रतिदंड[illegible]मिति भिन्नत्वे सतीत्यनेनान्वितं ॥ ननु तत्तद्व्यवहितपूर्ववृत्तितायाअवच्छेदकं न दंडत्वमतिप्रसंगात् ॥ किंत्वव्यवहितपूर्ववृत्तिजातीयतायाः साच न भिन्ने सत्वः संयोगस्य लक्षणानुरूपं दृष्टांतमाह ॥ चान्नीति ॥ वह्निसामानाधिकरण्यं वह्निसंयोगिसंयोगः तत्सामान्यस्य घटपूर्ववृत्तित्वसामान्यस्य वह्निसामानाधिकरण्यसामान्यस्य चेत्यर्थः ॥ न्यायकान्तासंयोग एव व्याप्यवृत्तिः ॥ तस्यापि वृक्षादौ यत्किंचिदवच्छेदकावच्छेदेनैव वृत्तेराकाशसर्वावच्छेदेन वृत्त्वसंभवाच्चेति ॥ गु[illegible]णस्येति ॥ सामान्याभावइत्यनेनान्वितं ॥ वृत्तेर्वह्निसंयोगस्य निरवरावच्छेदेनासत्वात्तेन संबंधेन वह्नेः सर्वावच्छेदेन सत्त्वरूपव्याप्यवृत्तित्वमत्यंतासंभावितमित्यर्थः ॥ न च संयोगस्य वृत्तेः समवायस्य मूले सत्वेपि संयोगासत्त्ववदिदमुपपद्यत इति वाच्यं ॥ तत्राप्यग्रावच्छिन्नसमवायस्यैव वृत्तित्वात्तस्य च मूलादावभावादिति ॥ एवं समवायसंबंधेनापि द्रव्यस्य दैशिकमव्याप्यवृत्तित्वं दशासु नपट इति प्रत्ययादिति ध्येयं ॥ प्रतियोगिमतोरिति ॥ प्रतियोगिमतः कालस्य प्रतियोग्यनधिकरणदेशावच्छेदेन प्रतियोगिमतो देशस्य च प्रतियोग्यनधिकरणकालावच्छेदेन तदभावइत्यर्थः ॥ तत्तत्साध्यकेति ॥ गुणवत्संयोगवद्वा द्रव्यत्वात् वह्निमान्धूमात् गोमान् एतत्कालत्वात् रूपवान् पृथिवीत्वादित्यादेर्वारणायेत्यर्थः ॥ व्याप्यवृत्तीति ॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येन रूपेण येन संबंधेन यद्व्याप्यवृत्ति तेन रूपेण तेन संबंधेन तस्य साध्यतायामित्यर्थः॥ तेन संयोग
त्वेनाव्याप्यवृत्तेरपि संयोगस्य समवेतत्वेन साध्यतायां कालिकतयाव्याप्यवृत्तेरपि घटत्वस्य समवा
येन साध्यतायां न प्रतियोगिव्यधिकरणपदमिति॥ अव्याप्यवृत्तिसाध्यके साध्यके प्रतियोगिव्यधिकर
णपदं क्वचिन्न देयं॥ संयोगाभाववान् गुणत्वादित्यादौ तत्संयोगत्वेनाभावात्॥ व्याप्यवृत्तिसाध्यके तु
क्वापि हेतौ तन्न देयमिति आविष्कर्तुं सर्वथेति॥ तेनेत्यादि॥ ना॥ एकत्र समवायेनापरत्र स्वरूपेण
न्य८ साध्यता॥ इदं च एकोऽभिप्रायेण निष्कृष्टलक्षणे व्याप्यवृत्ति साध्यके प्रतियोगिवैयधिकरण्याप्रवे
शात्॥ तत्र च घटान्यत्वविशिष्टसंयोगवान् द्रव्यत्वात् घटपटसंयोगघटभूतलसंयोगोभयवान्
घटपटान्यतरत्वादित्यादौ दर्शयति व्याप्तिबोध्या॥ विशिष्टस्य सार्वभौममते ऽतिरिक्तत्वात् भूतत्वेति॥
तदभावः॥ भूतत्वमूर्तत्वोभयत्वावच्छिन्नाभावः सहजं तत एवेति प्रतियोगितावच्छेदकावच्छि
न्नविपक्षांशिनैव मनोवृत्ति केवलमूर्तत्वस्य भूतत्वविशिष्टमूर्तत्वरूपप्रतियोगिनो अन्यत्वा
दिति भावः॥ ननु उभयत्वस्य विशिष्टत्वाऽतिरिक्तत्वेपि उभयत्वावच्छिन्नाभावप्रतीतिर्विशिष्टाभाव
एव विषय इति तस्य विशिष्टमेव प्रतियोगि इत्यत आह॥ तदेति॥ तदवच्छिन्नाभावः उभयत्वावच्छिन्ना
भावः॥ तदवच्छिन्नाभावात्॥ विशिष्टत्वावच्छिन्नाभावात्॥ अनतिरिक्त इति विपरिणतस्यानुषंगः॥
उपपत्तस्येति॥ प्रत्यक्षसिद्धत्वादिस्य नेनान्वितं॥ तदभावस्यातयोरभावस्य॥ न च विरुद्धयोरुभय

व

37

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२१·दि·५७·
१८

सि३

त्वावच्छिन्नाभावस्यातिरिक्तस्यासिद्धावपि समानाधिकरणयोरुभयत्वावच्छिन्नाभावधीरेकविशि
ष्टापराभावमेवावलम्बतेति वाच्यं॥ भूतत्वमूर्त्तत्वयोर्विरुद्धत्वभ्रमदशायामप्युभयत्वावच्छिन्ना
भावप्रत्ययेन तत्रापि विशिष्टाभावस्याविषयत्वादिति॥ तत्र॥ भूतत्वमूर्त्तत्वोभयाभावान् मूर्त्तत्वादि
त्यादौ॥ व्याप्तिरेवेति॥ तथा च लक्ष्यमेवतदिति भावः॥ तथात्वेपि। उभयत्वाधिकरणस्य मूर्त्तत्वस्य
सत्वेपि। तच्च। मनसि। तथा च हेत्वधिकरणसामान्ये साध्यतावच्छेदकावच्छिन्नाधिकरणतासत्त्वमे
व व्याप्तिसत्त्वं नतु साध्यतावच्छेदकाश्रयसत्त्व इति भावः। ननु ध्वंसप्रागभावादीनां प्रतियोग्यसा
मानाधिकरण्यपदेनैव वारणे लक्षणेऽत्यन्तपदं व्यर्थमत आह॥ अत्यन्तपदं चेति॥ अत्यन्ताभावत्व
निरूपकेति॥ एक एवाभावः कस्यचिदत्यन्ताभावः कस्यचिद्भेदोपीति। भवति तत्र यस्यात्यन्ताभा
वः स एव चात्यन्ताभावत्वनिरूपकप्रतियोगी न तत्सामानाधिकरण्यलाभायेत्यर्थः॥ क्रमे
णाव्यावृत्तिमाह॥ अन्यथेति॥ तद्भेदस्य। तयोरभावयोर्भेदस्य दुर्लभत्वात् पत्तेरिति॥ सर्वस्यै
वाभावस्य स्वात्मकभेदप्रतियोगि यदभावांतरं तत्समानाधिकरणत्वादिति भावः॥ न च भावरूपा
भावस्यैव प्रतियोग्यसामानाधिकरण्यं लक्षणमिति वाच्यं। तस्यापि स्वसमानाधिकरणभेदाभि
न्नतया तद्भेदस्य चाधिकरणस्वरूपत्वेन भेदरूपप्रतियोगिसमानाधिकरणत्वात्॥ अभावमा
त्राधिकरणकाभावे दं भावमात्रप्रतियोगिकोपि विशिष्टाभावायनात्मकोऽभावोऽधिकरण

व१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

38

भिन्नो नेष्यते। अत एव घटध्वंसवान् घटादित्यादौ सद्धेतावेव हेतुसमानाधिकरणाभाववानां स्वनिष्ठघटध्वंसा
त्यन्ताभावात्मको नो घटध्वंसात्मकात्यन्ताभावत्वनिरूपकप्रतियोगिसमानाधिकरणतया स्वप्रतियोग्यस
मानाधिकरणतादृशाभावाप्रसिद्ध्या व्याप्तिरिति परास्तं॥ घटध्वंसात्यन्ताभावस्य घटात्यन्ताभावात्मक
स्याधिकरणात्मकत्वादिति भावः॥ यद्यपि साध्यतावच्छेदकसंबंधेन प्रतियोगितावच्छेदकसंबंधेन वा
प्रतियोग्यसामानाधिकरण्यं सुलभमेव तथापि यथाश्रुताभिप्रायेणेदं॥ साध्यतावच्छेदकसंबंधेन प्रति
योग्यसामानाधिकरण्यविवक्षणेऽभावसाध्यके प्रतियोग्यसामानाधिकरण्याप्रसिद्धेरेवेति। हेतुसमाना
नाधिकरणेति॥ हेतुसमानाधिकरणं च तत्तदत्यन्ताभावत्वनिरूपकप्रतियोगिसमानाधिकरणाभाववांस्तद्
त्वे इति तत्तथा तस्य॥ अभावसाध्यकेति। घटत्वाभाववान् पटत्वादित्यादौ पटत्वसमानाधिकरणस्य गोत्वाभा
वस्यात्यन्ताभावत्वनिरूपकप्रतियोगितायां मोत्वे तदसमानाधिकरणस्य घटत्वाभावभिन्नत्वात् घटत्वाभा
वत्वेन तत्प्रतियोगितावच्छेदकमेवेत्यव्याप्तिः॥ संप्रत्यय इत्यस्य रसबीजं तु पादं प्रतियोगितावच्छेदकाव
च्छिन्नानधिकरणत्वं हेतुमत इत्यादिविवक्षाया आवश्यकत्वेऽस्येतत्पदवैयर्थ्यमेवेति॥ गोध्वंसवत्त्वेने
स८ ति॥ प्राचीनमते गोध्वंसस्यापि गवात्यन्ताभावविरोधित्वादिति भावः॥ यद्यपि दैशिकसंबंधेन गोध्वंसवत्त्वे
गवात्यन्ताभावो नेष्यते कालस्य च कालिकसंबंधेनैव गोध्वंसवत्त्वमिति तदति गवात्यन्ताभाववत्त्वे न विरो
धः। तथापि प्रतियोग्यसमवायिनो भूतलादेरिव कालस्यापि दैशिकसंबंधेन गोध्वंसवत्त्वमित्याश
यः॥ अत एव आश्रयनाशजन्यगुणनाशस्य भूतलादिदेशे समये च वृत्तित्वं वक्ष्यति॥ इदं च कालिकदेशि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शि० टि० १४०
१२

कसाधारणसंबंधस्य त्वस्यैकस्याभावात् दैशिकसंबंधेनाभावस्य हेतुसमानाधिकरणत्वं विवक्षितमि
त्यभिप्रेत्य॥ अन्यथा गोध्वंसस्य कालिकसंबंधेन गवा सत्ताभाववत्तावयविरोधि स्वाजन्यपरिगवास्यताभा
वस्य कालिकसंबंधेन सत्त्वेनातिव्यापेरिनवकाशा इति॥ न च साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिता
कस्यनिरूप्यप्रतियोगिकस्याविरूप्यप्रतियोगिताकस्य वा सत्ताभावस्य हेत्वधिकरणावृत्तित्वाप्रसिद्ध्याऽव्याप
मतिव्याप्तिरिकाश्चं॥ पूर्वक्षणावृत्तित्वविशिष्टगोत्वादेरभावस्यैव तादृशस्य प्रसिद्धेः। संसर्गेति। असंताभा
वपदेन संसर्गाभावमात्रोक्तावपीत्यर्थः॥ तथा च गोत्वावच्छिन्नध्वंसस्यैव दैशिकतया महाप्रलये वर्त्तनादतिना
तिव्याप्तिरिति भावः॥ यदा स्पंद इति। गोत्वावच्छिन्नयाव[illegible]नाशानंतरं स्पंदसत्त्वाद दतो द्व्यणुकपर्यंतानुधाव
वनं। अत्र च स्पंदनाशानंतरमेव द्व्यणुकनाशादिति भावः॥ अस्य च व्यभिचारो न महाप्रलये तत्र स्पंदाभा
वात्॥ किंतु खंडप्रलये॥ तत्र द्व्यणुकत्वा[illegible]वच्छिन्नध्वंसाभावादतिव्याप्तिरिति भावः॥ ननु चरमपरमाणु
कर्मणां चरमोत्तरसंयोगनाशानामधिकरणो महाप्रलयाव्यवहितपूर्ववर्त्ती यः क्षणो [illegible] द्व्यणुकसाव
च्छिन्नध्वंसस्य सत्त्वान्नातिव्याप्तिसंभव इत्यतो यदादृष्टमिति॥ अत्र स्पंदस्य हेतुत्वेऽपि न क्षतिः। न च खंडप्र
लये स्पंदसत्त्वे मानाभावः॥ ब्रह्मणो वर्षशतमित्यागमप्रसिद्धेरेव माना[illegible]सत्त्वात्। न हि क्रियां विना
तत्तत्क्षणामुहूर्त्तघटितस्य वर्षस्य संभव इति। नित्यसुखाभिव्यक्तिरिति मते यदादृष्टं तदान्यं ज्ञान।
मित्यत्र व्याप्तिरस्यैवेत्यतो दुःखवेति। अत्रापि महाप्रलयाव्यवहितप्राक्क्षणे महाप्रलयजनकादृष्ट
शालिनि दुःख[illegible]त्वावच्छिन्नध्वंसस्यान्नातिव्याप्तिः। स्वस्वसाक्षात्कारनाश्यस्य दुःखस्य महाप्रलयाय

स१

पृ शि ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर्तितप्राक्क्षणेऽसंभवादत आह । यद्वा वस्यादृष्टमिति । अत्र च तत्पुरुषीयचरमज्ञानध्वंसस्य तज्ज्ञानकादृष्ट
ध्वंसस्य च युगपदेव संभवान्न तत्पुरुषीयादृष्टसत्त्वकाले तत्पुरुषीयादिज्ञानात्यावच्छिन्नध्वंससत्त्वसंभाव
ना । व्यभिचारस्फुरणे प्रलये सुषुप्त्यादौ चेति । द्व्यणुकत्वादेरिति । महाप्रलये केषांचिद्द्व्यणुकानां ध्वंस
स्य केषांचित्प्रागभावस्य सत्त्वेन द्व्यणुकत्वस्य तत्प्रतियोगितातिरिक्तवृत्तित्वेन तत्प्रतियोगितानवच्छेदकत्वादि
त्यर्थः । ननु द्व्यणुकत्वावच्छिन्नानधिकरणकालवृत्तित्वविशिष्टस्यैव द्व्यणुकध्वंसस्य प्रतियोगितावच्छेदकं द्व्य
णुकत्वं अवच्छेदकत्वं चेहान्यूनवृत्तित्वमेवेत्यत आह । नहीति । तयोः ध्वंसप्रागभावयोः ॥ मतेपीति । वस्तुतः ध्वं
सप्रागभावयोरत्यन्ताभावाविरोधित्वादत्यन्ताभावस्यैव सामान्यावच्छिन्नप्रतियोगिताकत्वमिति भावः ॥ संभव
ति ॥ अवच्छेदकस्यानतिरिक्तवृत्तित्वनियमस्य नैरभ्युपगमादिति भावः ॥ तदपि साधीति ॥ प्रतियोगिध्वंसादीत्यर्थः ॥
विरोध्यभावादिति । न च साध्यकाभाव एव बाधकः ॥ प्रलयेपि गौर्नास्तीति प्रतीतेरेव साधकत्वादिति ॥ अन्यथा
ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे अत्यन्ताभावस्य कालिकसंबंधावच्छिन्नप्रतियोगिताकस्य विशि
ष्टाभावातिरिक्तात्यन्ताभावस्य दैशिकसंबंधेन कालमात्रावृत्तित्वप्रसंगादिति ॥ तेन समवायादिसंबंधेन
गवादेरभावस्य दैशिकतया गगनादेर्वर्तमानस्य कालिकसंबंधेन गवादेरभावस्य च कालिकतयाऽसत्त्वसं
भवेपि न दोषः ॥ ननु प्रतियोगिमति काले प्रतियोगितावच्छेदकीभूतकालिकसंबंधेन प्रतियोगिनो वि
रोधिनः स्यात्स्वपक्षे तदभावसत्त्वमत आह । द्वयोरिति ॥ एकस्य प्रतियोगिमतः कालस्यादेशाभेदः ।
प्रतियोग्यनधिकरणत्वादेशः ॥ तथात्वे । अत्यन्ताभाववत्त्वे । अपरस्य । तद्ध्वंसादिमतः । स्वरूपावच्छिन्नं ।
स्वस्य यद्रूपमधिकरणतावच्छेदकं तेनैवावच्छिन्नेन तु स्वरूपसंबंधेन केनापि । तथा चानवच्छिन्नवृत्ति

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

कमिति भावः। प्रतियोग्यधिकरणकालवृत्तेरत्यंताभावस्य कथं प्रतियोगिवैयधिकरण्यमत आह। न
च भ्रूयस्येति। कालिकसंबंधेन प्रतियोगिशून्यत्वेत्यर्थः। तथा च प्रतियोग्यनधिकरणवृत्तित्वरूपं वै
यधिकरण्यमक्षतमेवेति भावः॥ संसर्गाभावविशेषः। सहातनसंसर्गाभावः। संसर्गारोपेति। तादा
त्म्यातिरिक्तसंबंधेनयः प्रतियोगिन आरोपः तज्जन्याया धी स्तद्विषयोऽभावस्तत्त्वमित्यर्थः। तत्र। त
त्र। संसर्गाभावत्वे। तत्रापि तदन्या वृत्तित्वस्यैव नि
यत्वे। नियमांतरस्य संसर्गत्वघटकनियमस्य। वक्ष्यते सादिग्रंथेन। नियमाघटितमिति। आरोपस्य हेतु
त्वेनादि भावः॥ आदरीत्यस्वरसंप्रकाशयति। वक्ष्यते सादिग्रंथेन। नियमाघटितमिति। साध्यतावच्छेदकसंबंधेन स्वप्रतियोगि
तायां मानाभावादन्योन्याभावत्वमिति। प्रयोजनविरहइति। साध्यतावच्छेदकसंबंधेन स्वप्रतियोगि
संबंधित्वाभ(?) विप्रयानेवह्निमान्धूमादि साद्यावन्योन्याभावमादाय ... भावात् प्रयोजनविरह एवं
साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताविवक्षायां तादात्म्येन साध्यत्वे साध्यतावच्छेदकसंबं
धावच्छिन्नप्रतियोगिताकात्यंताभावाप्रसिद्ध्याऽव्याप्तिरित्यर्थः॥ वृत्तिनियामकसंबंधे
नप्रतियोग्यधिकरणं वाच्यं॥ विषयता च न वृत्तिनि... यामकेत्यतो नातिव्याप्तिः [स]
अत्र वै ५
भवात्यतो विशेषगुणवानिति॥ मूर्त्तमात्रस्यैव दिगुपाधित्वे कालोपाधावि दिगुपाधौ समवा
यादनात् तदधिकरणे एव दैशिकसंबंधस्वीकारः॥ तत्रेह मनसि विशेषगुणाः इत्यप्रत्ययादतोम
नो... दिनात् तदधिकरणे एव दैशिकसंबंधस्वीकारः॥ तत्रेह मनसि विशेषगुणा इत्यप्रत्ययादतो म
नोऽन्येति। अत्र व्यभिचाराधिकरणं दिक्कालावेव॥ अत्र च दिक्कृत दैशिकसंबंधेन काले च कालि
केन संबंधेन प्रतियोगिसत्त्वमिति न साध्याभावस्य प्रतियोगिवैयधिकरण्यमिति॥ अत्र च मनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यत्र [illegible] द्रव्यत्वाधिकरणे घटाद्यवृत्तौ तत्तद्भिन्नत्वाभाव एव संबंधसामान्येन प्रतियोगिव्यधिकरणः
प्रसिद्धः॥ दिक्कालेनेश्वरादनतिरिक्ते इति मते इदं सदनुमानमेवेत्यत आह॥ जातिमानिति। एकार्थेति। जा
तेः समानाधिकरणस्वात्मकस्वरूपसंबंधेन समवायस्य सत्त्वात् समवायेपि जातेरेकार्थसमवायः॥ जातिः
सतीत्यादिवत् समवायः सन्निति तु न्यत्वं सप्रतीतेरिति भावः। तादात्म्येन साध्यतायां संयोगादिना प्रतियो
गिव्यधिकरणस्य घटादेरभावस्य तादात्म्यावच्छिन्नप्रतियोगिताया अप्रसिद्ध्याऽन्योन्याभावमादायैव ल
क्षणगमनं तत्र च तादात्म्येन प्रतियोगिव्यधिकरणाप्रसिद्ध्याऽव्याप्तिरित्यत आह॥ संबंधीति। एतद
वस्य पक्षपतितिमिरतीति॥ एवं संबंधित्वस्य निवेशे॥ अन्योन्याभावोपीति। तथा च वह्नेः त्रिंशदुपाया
त्यत्र तादात्म्येन साध्यतायां नाव्याप्तिरिति भावः॥ ननु कपिसंयोगी एतत्त्वादित्यादौ कपिसंयोगाभा
वोपि गुणादौ कपिसंयोगवद्वृत्तित्वाभावात्तदानित्यव्याप्तिरनस्तदिति विशेषस्येति॥ प्रतियोगिव्यधिकरण
वृत्तित्वाभाव ~~[illegible]~~ विशिष्टस्य स्यार्थः॥ हेत्वधिकरणे द्रव्ये च तादृशप्रतियोग्यसामानाधिकर
ण्यविशिष्टाभावाधिकरणतानास्तीति भावः॥ तद्वृत्तिभिन्नत्वे प्रतियोगिमद्वृत्तिभिन्नत्वे [illegible] आव्यव
त्तीति संयोगी सत्त्वादित्यादौ संयोगाभावस्य संयोग[illegible]वद्वृत्तित्वेन तद्भिन्नत्वाभावात्। तद्वृत्तित्वाभा
वस्य हेत्वधिकरणगुणाद्यवच्छेदेन वर्त्तत एवेति भावः॥ अत्रास्वरसमाह॥ अन्यच्चेत्यादि नाप्रतीतेः॥ क
पिसंयोगाभावे गुणे न कपिसंयोगसामानाधिकरण्यमिति प्रतीतेः॥ [illegible]। तद्वच्छेदकत्वाभावा
दित्युक्तत्वेन वक्ष्यतीमणिकारः॥ तच्च। प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वं [illegible] च्चहेत्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री॰दि॰प॰
२१

धिकरणइति॥ तेन कपिसंयोगी एतद्वृक्षत्वादित्यत्र कपिसंयोगाभावस्य गुणे प्रतियोगिवैयधिकर
ण्यावच्छेदकावच्छिन्नेऽपि सत्त्वेपि नाव्याप्तिः॥ हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वावच्छेदकावच्छि
न्नो योऽभाव इत्यपेक्षया प्रतियोग्यनधिकरणीभूतहेत्वधिकरणीभूतहेत्वधिकरणवृत्त्यभावस्य
त्र लाघवात्तथैवाह॥ प्रतियोग्यनधिकरणीभूतेति। प्रतियोगितावच्छेदकेत्यादिषष्ठ्यन्तानि अनधि
करणेत्यत्रान्वितानि। तत्सामान्यस्य। प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्य। यत्किंचिदवच्छि
न्नस्य। यत्किंचिदवच्छिन्नसामान्यस्य प्रतियोगितावच्छेदकादि यावत्त्वे तु यावत्तदवच्छिन्नाप्रसिद्धेरेव नाशं
कितं॥ तच्चत्वं तरेति प्रतियोगिव्यक्त्यन्तरेत्यर्थः॥ द्रव्ये संयोगसामान्याभावस्य स्वसमवेतस्वसत्त्वेन संयो
गसामान्याभाववान् सत्त्वादिति॥ सिद्धेरेवेत्यतो द्रव्यत्वाभावान्निति॥ प्रथमे योजयति॥ साध्याभावव
लइति॥ तत्प्रतियोगीति॥ संयोगस्वरूपसाध्याभावस्य प्रतियोगी यः संयोगविशेषाभावस्तद्वत्सा
दित्यर्थः॥ संयोगसामान्याभावस्यैव संयोगविशेषाभावस्यापि संयोगरूपाभावप्रतियोगित्वादि
त्तिभावः॥ द्वितीये योजयति॥ नित्यत्वादिति॥ नित्यत्वादिविशिष्टद्रव्यत्वासत्त्वे भावाभावात्मको यः सा
ध्याभावप्रतियोगित्वस्याधिकरणत्वात् साध्याभाववतो द्रव्यस्येत्यन्वयः॥ स्वाभावेति॥ स्वं नित्यत्वे
विशिष्टद्रव्यत्वं तदभावाभावात्मकस्य नित्यत्वविशिष्टद्रव्यत्वस्य द्रव्यत्वानतिरिक्तत्वादिति भावः॥ न
नुच्चात्र सर्वस्यैवाभावस्य स्वीयतत्तदधिकरणवृत्तित्वविशिष्टस्वाभावेन प्रतियोगिना समं सामाना
धिकरण्यादेकाधिकरणमात्रवृत्तिगुणादिरूपाभावस्यापि पूर्वलक्षणवृत्तित्वविशिष्टस्वाभावेन प्रतियो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गिनासामानाधिकरण्यात् प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या कथमतिव्याप्तिरिति चेत्॥ अत्र केचित्॥ अ
तिव्याप्तिपदमसंभवपरमित्याहुः॥ वस्तुतो गगनाद्यभाव एव वक्ष्यमाणखंडशः प्रसिद्ध्या प्रतियोग्यसमा
नाधिकरणः नित्यत्वविशिष्टगगनाभावस्य योऽभावस्तदभावो नित्यत्वमेव॥ ननु गगनाभावस्तु स्यादिति प्र
सक्तत्वादिति॥ न चैवं नित्यत्वविशिष्टद्रव्यत्वाभावस्याभावो नित्यत्वमेव स्यादिति वाच्यं॥ नित्यत्वस्य गु
णादौ द्रव्यत्वस्यानित्यद्रव्येऽतिप्रसक्तत्वात्॥ नित्यत्वविशिष्टद्रव्यत्वस्यैव तदभावाभावात्मकत्वादिति॥
कपीति [illegible] प्राचां मते संयोगसामान्याभावस्य द्रव्येऽभावादिति शिष्य[illegible]नुसरणं॥ द्रव्यत्वाभाववान् द्रव्यादौ
त्य तु द्रव्यत्वाभावेरूपयत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वहेतुमत्त्वस्य प्रतियोगिता
न द्रव्यस्य संभवतीति नातिव्याप्तिसंभव इति भावः॥ गुणसामान्याभावस्योत्पत्तिकालावच्छेदेन घटादौ
संभवात् घटत्वादिकमुपेक्ष्यात्म[illegible]त्वानुसरणं॥ न च समवायेन मेयसामान्याभावस्य द्रव्यमात्रसमवेता
न६ भावस्य च प्रतियोगिनोऽधिकरणत्वस्य घटादौ संभवात् घटत्वादिकं किमिति त्यक्तमिति वाच्यं॥ सम
वायेन मेयसामान्याभावाभावः सत्त्वेव द्रव्यमात्रसमवे[illegible]ताभावाभावो द्रव्यत्वमेव लाघवादिति कपि सं
योगात्मकस्य सा[illegible]भावस्य तयोरप्रतियो[illegible]गित्वमिति गुणसामान्याभावस्य तत्प्रतियोगितावच्छेद
कत्वमाविष्कर्तुं॥ तृतीयपक्षानुसारेण तत्परिहरति॥ यादृशेति॥ यादृश्या प्रतियोगितायाः अवच्छेदकावच्छिन्ना
नधिकरणत्वं हेत्वधिकरणस्य तादृश्याः प्रतियोगितायाः अनवच्छेदकत्वस्य सत्त्वार्थः॥ कपि संयोगाभाववा
नात्मत्वादित्यादौ गुणसामान्याभावत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानाधिकरणत्वं हेत्व

सि.सो ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिकरणवृत्तिहेतुमत्त्वाद्दशप्रतियोगितानवच्छेदकस्य स्यन्दपि संयोगाभावत्वेसत्त्वान्नाव्याप्तिः ॥ द्रव्यत्वा
भाववान्सत्त्वादित्यादौ तु द्रव्यत्वाभावत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तिहेतुमत्त्वस्य प्र
तियोगितावच्छेदकस्य स्य द्रव्यत्वाभावत्वेसत्त्वान्नातिव्याप्तिः ॥ वर्तमानत्वमिति ॥ अभावस्य वृत्तौ च संबंधो
न निवेशनीयः प्रयोजनाभावात् । व्याप्यवृत्तिसाध्यके तु अभावस्य दैशिकसंबंध एव निवेशनीयः ॥ तेन ज्ञा
तिमान्सत्त्वादित्यादौ जात्यभावस्य कालिकवृत्त्या हेतुमति वृत्तावपि न क्षतिः ॥ दैशिकसंबंधः ॥ क्वचिद्दैशिक
विशेषणता क्वचिच्च समवायादिरपि तेन द्रव्यत्वाभाववान्सत्त्वादित्यादौ दैशिकविशेषणतया द्रव्यत्वादे
रसत्त्वेऽपि [illegible] नातिव्याप्तिः ॥ वस्तुतस्तु ॥ द्रव्यत्वं नास्तीति वत् द्रव्यत्वाभावो नास्तीति संबंधांतरे
ण्याकारप्रतीतिबलाद्भावानामपि दैशिकविशेषणतास्वीकार्या ॥ अत एव द्रव्यत्वाभाववान् ज्ञातित्वादित्या
दौ समवायसंबंधावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावे साध्ये ज्ञातित्वाद्यधिकरणे समवायसंबंधेन वृत्ते
प्रसिद्ध्या दैशिकतया वृत्तिविवक्षणे द्रव्यत्वाभाववान्मेयत्वादित्यादौ अतिव्याप्तिरिति दूषणं नावकाशः कालि
सा ५ लसंबंधावच्छिन्नप्रतियोगिताकआकाशाभावाभाववान्ध्ये आत्मत्वादित्यादि हेतौ कालिकसंबंधेन आत्मत्वा[illegible]
धिकरणे वृत्तेरप्रसिद्धेः दैशिकविशेषणतया तद्वृत्त्याकाशाभावप्रतियोगितावच्छेदकस्य साध्यता
वच्छेदकेऽसत्त्वादव्याप्तिरतो व्याप्यवृत्तिसाध्यकेऽपि तत्र प्रतियोगिवैयधिकरण्यं देयमिति ॥ ग्राह्यसामानाधि
करण्ये साध्यस्य यादृशः संबंधः प्रविष्टस्तत्त्वयः ॥ तेन संबंधेन यो हेतुमान्निष्ठस्य फलमाह ॥ धूमसमवा
यीत्यादिना ॥ साध्यत्वेऽस्य फलमाह ॥ धूमसंयोगीत्यादिना ॥ प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यस

स्प०१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बंधिहेतुसंबंधित्वस्याभावस्य साध्यतावच्छेदकावच्छिन्नसंबंधावच्छिन्नाया प्रतियोगिता यत्र संबंधरूपत्वे नोगौर
वाद्दह॥ यदेति॥ तादात्म्येन साध्यतायां साध्यतावच्छेदकसंबंधेन प्रतियोग्यधिकरणत्वस्याप्रसिद्धेः प्रति
योग्यसंबंधीत्वमिति। संबंधभेदेन। साध्यतावच्छेदकसंबंधेन॥ एवं स्थिते। प्रतियोग्यसंबंधित्वघटित
प्रतियोग्यसामानाधिकरण्यनिर्वचने। सामानाधिकरण्यमित्यादौ सर्वत्राधिकरणत्वांशे। आदिना हेतुसा
मानाधिकरणेत्यस्य परिग्रहः॥ धर्मिणः॥ व्याप्यव्यापकधर्मतो वह्निमतः। एवमित्यादि धर्मिणो धूमव
न्निव्याप्यत्वे तः धर्मव्याप्यत्वं धर्मिणो वह्निमतः॥ धर्मव्यापकत्वं धूमव्यापकत्वं चेत्यर्थः॥ अत एवं तादात्म्येन हेतौ व्य
वस्थापनादेव। ननु जलादीनां पृथिवीत्वाभाव[illegible]व्यापकत्वेपि पृथिवीत्वाभावस्वरूपव्यापकाभा
वेन जलादीनामसत्त्वं तार्थवं एवं सिद्ध्येत्तान्योन्याभाव इति तदुपपादयति॥ यथा चेत्यादि क्रमेण फलमा
ह॥ नैवेत्यादिना॥ धूमावयवे समवायेन तादृशधूमवत्त्वग्रहेपि न संयोगेन वन्ह्यनुमितिः॥ पर्वते संयोगे
न धूमवत्त्वग्रहेपि न समवायेन वन्ह्यनुमितिरित्यर्थः॥ न चात्र बाध एव विरोधीति नदनवतारेपि तथा
त्वस्यानुभाविकत्वादिति॥ अन्वयिनि नियमव्यवस्थाप्यत्व दृष्टान्ते नैव व्यतिरेकिण्यपि नियमं व्यवस्थापय
ति॥ तथैवेति॥ एतदेवान्वयव्यतिरेकाभ्यां द्रढयति॥ कथमप्येति॥ कथमन्यथा इति नियम उपपद्यत इत्यन्व
यः॥ नियमं दर्शयति॥ समवायेनेत्यादिना संयोगेन न निवर्त्तत इत्यन्वयः॥ निवर्त्तते चेत्यत्र धूम इत्यनुषंगः॥
प्राचीनन्यायसंमतिं दर्शयति॥ इत्थमेवेति॥ तादात्म्येन व्याप्तिव्यवस्थापनेन चेत्यर्थः॥ तद्धात्रीं त्रिपाद्या इति॥
यात्रिंशिपासक्तक्षः इति क्रमेणेत्यर्थः॥ अन्यदप्युपष्टंभकमाह॥ अत एवेति॥ यत एव च तादात्म्ये नापि व्यापकत्वं

न्य५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत एवेत्यर्थः॥ अन्यदप्युपष्टंभकमाह॥ अत एवेति॥ यत एवेति॥ यत एव च तादृशत्वेनाव्यापकत्वं अत ए
वेत्यर्थः॥ गोत्वत्वोपस्थितिदशायां तु तत्र गोत्वस्यैव समवायेनानुमितिरित्यादि वक्तुं शक्यत इति तद्ग्रहदशाया
मित्युक्तं॥ अत्र च स्वरूपत उपस्थित एव गोत्वे तादृशप्रतियोगितानवच्छेदकत्व[illegible]ग्रहो विलक्षणविषयतायाः[illegible] ग
अनुमितिहेतुः॥ अन्यथा तादृशप्रतियोगितानवच्छेदकगोत्वावच्छिन्नसंबंधिसास्नादिरित्येवंरीत्या ग्रह
स्य गोत्वत्वाग्रहदशायां असंभवादसंगत्यापत्तेः॥ [illegible]भावग्रहेऽधिकरणतावच्छेदकप्रकारेणाधि
करणोपस्थितिः [illegible]कारणमिति स्वरूपत उपस्थिते गोत्वे केऽपि तादृशप्रतियोगितावच्छेदकत्वा
भावग्रह इति वाच्यं॥ अभावलौकिकप्रत्यक्षं प्रत्येव तथा हेतुत्वस्याभ्युपगमादत्र तदभावस्यालौकि
कप्रत्यक्षांगीकारात्॥ वस्तुतस्तु॥ वक्ष्यमाणाभिप्रायेणेदं॥ तादृशप्रतियोगितासामान्ये स्वविशि
ष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेदकत्व घटत्व साध्यतावच्छेदकसंबंधावच्छिन्नत्वोभया
भावः इत्यत्र तादृशत्वेन गोः साध्यत्वे गोसंबंधिनिष्ठाभावे[illegible] गोत्वत्वस्य निवेशात् गोत्वत्वानुपस्थि
तिदशायां तादृशज्ञानासंभव इत्यर्थः॥ तादृशत्वेन गोः सिध्यतीत्यन्वयः॥ एवं चेति॥ हेतुसंबंधी साध्याभि
धाने च इत्यर्थः॥ [illegible]नियामकेति॥ संयोगमात्रस्याधेयत्वाघनवच्छिन्नसंयोगस्यान एव व्यक्ति
यामसंबंधे इत्यर्थः॥ इह भूतले घटो नास्तीत्यादावाधेयत्वावच्छिन्नसंयोगस्यैव प्रतियोगितावच्छेदक
संबंधविधया विषयः॥ तथैवानुभवात्॥ यद्वाऽऽधेयत्वसमविषयीकृत्यस्य तु[illegible] संयोगमात्रं प्रतियो

कृ २ ५ गोत्वस्य स्वरूपेणैव प्रवेशः॥ समवायेन गोत्वस्य साध्यतायां स्वविशि
ष्टसंबंधिनिष्ठाभावेऽतो ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गितावच्छेदकसंबंधविधया विषयीकृत्याभावः प्रत्ययः प्रामाणिकस्तदा गगनादेः पृथिवीत्वादिव्यापकत्वमितितात्पर्यार्थः ॥ केचित्तु ॥ मात्रपदं कृत्स्नार्थकं तेन गगनवान्पृथिवीत्वादित्यत्र अत्वादिनिष्ठेन वृत्तिनियामकसंयोगेन वर्त्तते योयः गदभावस्य पृथिव्यां प्रतियोगिव्यधिकरणस्य तादृशसंयोगावच्छिन्नाया प्रतियोगितातदनवच्छेदकसंबंधे त्वमादाय लक्षणसमन्वयः ॥ अन्यथा गगनसंयोगमात्रस्यैव तादृशस्य प्रतियोगितावच्छेदकसंबंधत्वपक्षे नान्यस्य स्फुरगगनाभावस्यैव प्रतियोगितायां तादृशसंबंधावच्छिन्नत्वसत्वे प्रतियोगिव्यधिकरण्याभावांतरप्रतियोगितायां तादृशसंबंधावच्छिन्नत्वस्याप्रसिद्ध्या लक्षणासंगतिः स्यादिति वाच्यम् ॥ प्रतियोगितावच्छेदकसंबंधा~~त्वरूपे सिद्धे चे इति ॥ तस्य प्रतियोगितानवच्छेदकत्वे साध्यतावच्छेदकवृत्तिनियामकसंयोगावच्छिन्नायाः प्रतियोगिताया अप्रसिद्धिः स्यादित्यर्थः ॥ द्वितीयाविवक्षानुसारेणाह ॥ साध्यतावच्छेदकेत्यादि ॥ इत्थंच वृत्तिनियामकसंयोगस्याभावप्रतियोगितानवच्छेदकत्वेपि न क्षतिः ॥ तेन संबंधेन प्रतियोग्यसंबंधिनि घटाभाव एव तथाविधः प्रसिद्धः इति ॥ ननु सतिकाले ऽन्यस्य प्रलयकाले च नित्यस्य पृथिवीमात्रस्यैव गगनाभाववत्त्वात् कथं तस्य पृथिवीत्वव्यापकत्व~~मत आह ॥ तदभाववतोपीति ॥ तत्संबंधित्वात् गगनाभावे सति यामकसंयोगे दिना संबंधित्वात् ॥ तथाच गगनाभावो न प्रतियोगिव्यधिकरण इति भावः ॥ तथैव सति नियामकसंयोगे नैव असंबंधित्वादित्वादित्यनेन साध्यसामानाधिकरण्यस्य व्याप्तिघटकस्याऽभावः प्रदर्शितः ॥ नन्वेवं वृत्तिनियामकसंयोगेन गगनादेः सामानाधिकरण्यज्ञानस्यानुमितिहेतुत्वनये चाह ॥ अव्यापकत्वादिति ॥ कथमव्यापकत्वं तेन संबंधेन गगनाभावस्य प्रतियोगिसंबंधिनोऽप्रसिद्ध्या प्रतियोगिवैय्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सि॰ द्वो

रा॰ दि॰ प॰
२४

धिकरण्याभावानादृशस्याभावांतरस्यापि प्रतियोगितयाव्यापकत्वमेव तस्य स्यादत आह ॥ व्यर्थेति ॥ अग्रे खं
डशः प्रसिद्ध्या काश्यभावस्यापि प्रतियोगिवैयधिकरण्यनिर्वाच्यमित्यर्थः ॥ अव्याप्तिरिति ॥ क्रिया
याः सकरखंडकाल वारणाय चरमद्रव्यपदं ॥ खंडकालेति तत्तत्व्यक्त्यभावस्य प्रतियोगिवैय्य
धिकरण्यसंभवात्तद्विधसंव्यापकत्व मेव स्यादत सर्वाणि विशेषणानि । यद्य
पि चक्षुर्व्यातिरिक्तेति वक्तुमुचितं तावते च महाकाललाभ संभवात् इतरेषामाकाशादीनां का
लत्वाभावादेव वारणात् तथापि तांत्रिकपरिभाषामात्रित्य तथाभिधानं । तथा च महाकालोपव्या
न एतत्स्वरिमाणा दित्यादाव व्याप्तिरित्यर्थः ॥ ननु महाकालान्यत्व विशिष्टघटाभावस्य महाकालेत्र
ति यामिव्यधिकरणोक्तिस्सत आह ॥ विशेषणताविशेषेणेति ॥ महाकालवृत्तिविशेषणताविशेषेणेत्यर्थः ॥
महाकालविशेषणतया इदानीं घट इति प्रतीति विषयखंडकालीयविशेषणताविलक्षणात् ॥ कथम
६५ न्य येदानीं सर्वमिति प्रतीत्यभावेपि कालः सर्वोनिसौ पपत्तिक प्रतीतिबलात्कालस्य सर्वाधिकरण
त्वमिति ॥ केचित्तु ॥ इदानीमिति धीविलक्षणा धीर्महाकालेनाभ्युपेयत इदानीमिस्यत्तु महाकालायधि
त्वाएतत्क्रिया एतत्क्रियावच्छिन्नो वा महाकालोऽधिकरणत्वेन विषय इति महाकालेपि सैव विशेषणता
महाकाले च महाकालान्यत्वं तत्संबंध घटानां तादृशविशेषणतया सत्वात् महाकालान्यत्व विशि
ष्टघटोपि महाकालवृत्तिरिदानीं महाकालान्यत्वविशिष्टो घट इति धीसत्वात् । न चैवं गुणान्यत्वविशि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षसत्तापि गुणवृत्तिः स्यादिति वाच्यं ॥ गुणो गुणान्यत्वविशिष्टसत्तावानिति धीविरहादित्याहुः ॥ व्याप्यवृत्ति
साध्यकप्रतियोगिवैयधिकरण्यस्यानुपादानादाह ॥ अव्याप्यवृत्तीति । न च कालिकसंबंधेन सर्वस्यैवाव्या
प्यवृत्तित्वात् तत्संबंधेन व्याप्यवृत्त्यप्रसिद्धिरेवेति वाच्यं ॥ यतः कालिकसंबंधेन व्याप्यवृत्तित्वाकाशाभावादि
रेव ॥ कालिकविशेषणतया प्रतियोग्यनधिकरणकालावच्छेदेन देशे दैशिकसंबंधावच्छिन्नघटाभाववत्त्ववि
शेषणतया प्रतियोग्यनधिकरणदेशावच्छेदेनैव काले कालिकसंबंधावच्छिन्नाभावसत्त्वात् ॥ न चाकाशका
लावच्छिन्नाभावस्य दैशिकतयाऽनधिकरणमस्ति केवलान्वयित्वात् । कालिकतया तदनधिकरणस्याप्रसि
देः सत्त्वेऽपि कालेतदवच्छेदेन तत्[illegible]दभावासंभवात् ॥ अत्र मनि इदानीमाकाश[illegible]भाववद्[illegible]प्रतीत्याभा
त्माघवच्छेदेन तत्काले आकाशाभावस्यापि विषयीकरणात् । न च कालिकतया आकाशाभावाभावस्य आत्मा
पि वृत्तेः कालिकतया काले सत्त्वात् धारणाप्रतियोगिवैयधिकरण्यमावश्यकमिति वाच्यं । व्याप्यवृत्तित्वसा
ध्यकहेतौ कालिकविशेषणतया हेतुसमानाधिकरणस्यैव निवेशेनाव्याप्यभावात् । अन्यथा सत्तावान् आत्मत्वादित्या
दावपि कालिकतया सत्ताभावस्य हेतुसामानाधिकरण्यात्[illegible] प्रतियोगिवैयधिकरण्यनिवेशेना
पत्तेरित्यतिसंक्षेपः । तत्र विवक्षाद्वयस्यैवासंभवं दर्शयति ॥ स्वावच्छेदकसंबंधेनेत्यादिना । स्वं प्रतियो
गिता । तत्संबंधावच्छिन्नत्वस्य । कालिकसंबंधावच्छिन्नत्वस्य असंभवादित्यग्रिमेणान्वयः ॥ संबंधः ॥ प्र
तेना । संबंधेन । कालिकसंबंधेन । न चेति ॥ वाच्यमित्यग्रिमेणान्वयः ॥ ताद्दशेति ॥ ताद्दशसंबंधः ॥ प्र
तियोगितावच्छेदकसंबंधः । साध्यतावच्छेदकसंबंधो या इदंच्यावृत्तीसनेनान्वितो । संबंधविवक्षायाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२५ ८.५०

पि०

फलमाह॥ सत्त्वादीति॥ इदं ज्ञानवत्संयोगवद्वा सत्त्वादित्यादावित्यर्थः। तत्र विशेष्यतायाः वृत्त्यनियामकत्वा
दाकाशादौ ज्ञानाभावस्य वृत्तिनियामकसंबंधेन प्रतियोगिवैयधिकरण्यं सुघटमेवेत्यतः संयोगसा
ध्यकानुसरणं। तत्रापि नित्यगुणे संयोगस्य केनापि संबंधेनासत्त्वात्तत्रापि प्रतियोगिवैयधिकरण्यं
स्यादत आह॥ आदीति॥ आदिना गुणान्यत्वविशिष्टसत्तापरिग्रहः॥ अत एवाह कर्मण्येवेति॥ इत्थं च
कर्ममात्रस्यैव कालिकतया संयोगवत्त्वात् तत्र संयोगाभावस्य प्रतियोगिवैयधिकरण्यासंभवादति
व्याप्तिरिति भावः॥ सत्ताद्यधिकरणसामान्यसमवेतत्वाभावस्य संयोगेऽसंभवादाह॥ यत्किंचिदि
ति॥ प्रतियोगितावच्छेदकविशेषणस्य फलमाह॥ मूल इति॥ द्वित्वावच्छिन्नाभावस्य मनोवृत्ति
प्रतियोगित्वेपि द्वित्वावच्छिन्नस्य मनोवृत्तित्वाभावात्। प्रतियोगिवैयधिकरण्यं तत्रेत्यर्थः॥ द्वित्वावच्छि
न्नप्रतियोगिताकाभावस्य वृत्तित्वे प्रतियोगिता विशिष्टस्येव वृत्तित्वाभिप्राये उक्तालिव्याप्ति
रास इति स्पष्टार्थमाह गुणेति॥ अत्र विशिष्टसत्तात्वावच्छिन्नप्रतियोगिता विशेष्यपर्याप्तवृत्तिकेति
भावः॥ विशिष्टांतद्वयं मनोगुणयोर्यथाक्रममन्वेति॥ सामान्य इत्यस्य फलमाह॥ संयोगसामान्ये
त्विति॥ तथा च संयोगिद्रव्यत्वादित्यादौ संयोगव्यक्तिविशेषस्य यत्किंचिद्द्रव्यावृत्तित्वेपि प्रत्यास
तिकालावच्छिन्नसंयोगाभावो न प्रतियोगिव्यधिकरण इति नाव्याप्तिरिति भावः॥ विशिष्टस्येति॥ तथा
च गुणान्यत्वविशिष्टसत्तावान् ज्ञानेरित्यादौ गुणावृत्तित्वस्य विशिष्टसत्तायां शुद्धसत्तानतिरिक्ततया
मभावात् न विशिष्टाभावो निरुक्तप्रतियोग्यसमानाधिकरण इत्यसतिव्याप्तिरिति भावः॥ ननु यत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्छिन्नत्वघिकरणवृत्तितानवच्छेदकप्रतियोगितावच्छेदकत्वं वक्तव्यमत आह॥ समवायेनेति। अति
व्याप्तिं संभवघटयति जातिमदिति। मेय साधिकरणस्य घटस्याभावादेः प्रसिद्धाभावपि तत्प्रतियोगि
तानवच्छेदं जातित्वेनावच्छिद्यते जातिशून्येच समवायेन वृत्त्यप्रसिद्ध्या जातित्वावच्छिन्नाभावो न प्रतियोगि
व्यधिकरण इति भावः॥ ननु जातेर्व्याप्यवृत्तित्वात्तत्साध्यके प्रतियोगिवैयधिकरण्यमेव न देयमतः संयो
गादीति॥ गुणकर्मान्यत्वेति॥ एकैकानुपादाने तत्रैव प्रतियोगिवैयधिकरण्यप्रसिद्धंस्यादतः उभया
न्यत्वमुपात्तं॥ अद्रव्ये गुणादौ समवायेन वृत्तेः प्रसिद्धत्वादाह॥ हेतुमतीति॥ तादृशं च सामान्यादिकमिति
भावः॥ साध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबंधिहेतुसंबंधिनिष्ठाभावं तमादाय नाभावसाधारणं निर्व
क्तिसाध्यतावच्छेदकेत्यादिना। प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यसंबंधीत्यादि विवक्षायामन्यगगनादेर्ध
मत्वपक्षे निरूप्यदर्शनीयत्वान्नतत्र समाधिरुक्तः॥ क्वचित्तादृशसंबंधेवेत्यपि पाठः॥ तत्र प्रतियोगिताव
च्छेदकसंबंधसामान्ये साध्यतावच्छेदकसंबंध सामान्येचेत्यर्थः॥ वह्निमान् धूमादित्यादौ महानसीय
वह्निसंयोगस्यापि वह्नित्वावच्छिन्नप्रतियोगिकत्व धूमाधिकरणपर्वतनिष्ठत्व पर्वतानुयोगिकत्वोभ
याभावचत्त्वाद व्याप्ते वैरूपणाय सामान्य इति। निरूक्तेति॥ यादृशाभावप्रतियोगितावच्छेदकविशिष्टस्यर्थः॥
घटादिसंयोगनिष्ठपर्वतानुयोगिकत्वव्यक्तिविशेषायोगोलकीयवह्निसंयोगनिष्ठवह्निप्रतियोगिकत्वविशे
षोभयाभावस्य संयोगसामान्ये सत्वात्तथैवाव्याप्तिरतः सामान्योभयेति॥ अत्रत्य प्रतियोगित्वमनुयोगित्वंच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संबंधनिरूपितं प्रतियोग्यनुयोगिनिष्ठं अधिकरणत्वादिव्यावृत्तः स्वरूपसंबंधविशेषः। सच संबंधभेदेपि न
भिन्नः। तेन धूमसंयोगे कालिकसंबंधेनायोगोलकवृत्तित्वसत्वेपि नायोगोलकत्वानुयोगिकत्वं किंतु धूमसंयो
९३ गीयकालिकसंबंधेनायोगोलका[illegible]नुयोगि[illegible]त्वमिति नातिव्याप्तिः॥ एतेन हेत्वधिकरणानुयो
गिकत्वे सत्यनुयोगिकत्वसामान्यप्रवेशे धूमवान् वन्हेरित्यादावतिव्याप्तिः। धूमसंबंधस्य कालिकसंबंधे
नायोगोलकानुयोगिकत्ववत्त्वात्॥ संयोगीयविलक्षणानुयोगिकत्वप्रवेशेपि द्रव्यं वा न सत्वादित्यादौ सं
योगेन साध्यतायामतिव्याप्तिस्तत्र हेत्वधिकरणीभूतगुणानुयोगिकत्वस्य संयोगनिष्ठस्याप्रसिद्धेर्द्रव्या
भावस्य गुणे प्रतियोगिवैयधिकरण्याभावादिति दूषणमलग्नकं गुणानुयोगिकत्वस्य समवायादावेव प्रसि
द्धेरिति विवक्षितत्वादिति। अभावांतेन विवक्षितत्वादित्यर्थः॥ यत्किंचित्पदस्य प्रयोजनमाह॥ वन्ह्यधिकर
णायोगोलकेति॥ अन्यथा वन्ह्यधिकरणसामान्यानुयोगिकत्वधूमप्रतियोगिकत्वोभयस्य धूमसंयोगे
सत्वात्प्रतियोगिवैयधिकरण्यं न स्यादिति भावः॥ निरुक्तपदस्य फलमाह॥ चैत्रान्यत्वेति। चैत्रान्य
त्वविशिष्टदंडवान् दंडादित्यादौ चैत्रान्यत्वविशिष्टदंडाभावप्रतियोगि एतद्दंडः तत्प्रतियोगिकत्वचैत्रा
नुयोगिकत्वोभयाभावस्य चैत्रवृत्तिदंडसंयोगेऽसत्वात्प्रतियोगिवैयधिकरण्यं न स्यात्। निरुक्तपद
दाने तु चैत्रवृत्तिदंडसंयोगे चैत्रान्यत्वविशिष्टदंडप्रतियोगिकत्वाभावादुभयाभाव इति भवति चैत्रा
न्यत्वविशिष्टदंडाभावः प्रतियोगिव्यधिकरण इति भावः॥ एकस्या एव दंडव्यक्तेः चैत्रान्यत्वविशि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यो भावे

ष्टत्वेन साध्यत्वं दंडत्वेन हेतुत्वं चेत्येतत्सूचयितुमेतदिति। अन्यथा चैत्रवृत्ति दंडव्यक्तेः चैत्रान्यत्वविशिष्ट
त्वेन चैत्रान्यत्वविशिष्टतद्दंडाभावप्रतियोगिप्रतियोगिकत्वाभावात् निरुक्तपदं विहाय केवलप्रतियोगिकत्वा प्र
न्तावपि उभयाभावसत्त्वेन प्रतियोगिवैयधिकरण्यसंभवान्निरुक्तपदानर्थक्यापातः। समवायेन साध्यता
यामपि निरुक्तपदव्यावृत्तिमाह। गुणेति॥ यद्यपि समवायस्यैक्यात् गुणकर्मान्यत्वविशिष्टसत्ताप्रतियो
गिकत्वगुणानुयोगिकत्वोभयमपि समवायेऽस्त्येवेति निरुक्तपदेऽनेपि न प्रतीकारः। न च साध्यतावच्छेदका
वच्छिन्नसाध्यप्रतियोगिकसंबंध एव साध्यतावच्छेदकसंबंधो तत एव धूमसंयोगइत्यादिना तथैव वदन्तीति। त
था च समवाये गुणानुयोगिकत्वसत्त्वेपि च गुणकर्मान्यत्वविशिष्टसत्तासमवायगुणानुयोगिकत्वाभावा
त् उभयाभाव इति वाच्यं। तथा सति निरुक्तपदवैयर्थ्यापातात्॥ तथापि समवायस्य नानात्वाभिप्रायकोयं
ग्रंथः॥ अत एवोत्तरविवक्षायां समवायस्यैकत्वेपीत्यादिनाऽस्यां विवक्षायामस्वरसं वक्ष्यति। केचित्तु। समवा
यस्य तत्तन्निरूपितस्यैव संबंधत्वं। न तु शुद्धस्य। अन्यथा रू[illegible]पिनिरूपीव्यवस्था न स्यात्। तथा च संबंधप
दस्वरसात्तद्धर्मरूपावच्छिन्नसमवायस्य संबंधत्वं तत्तद्रूपावच्छेदेनैवोभयाभावः सामान्यपदोपादानाद्ध
च्यः। तथा च सत्ताप्रतियोगिकसमवायस्यापि संबंधत्वा[illegible]त्तत्प्रतियोगिकत्वावच्छेदेन केवलसत्ताप्रतियो
गि[illegible]त्वगुणानुयोगित्वोभयसत्त्वात् विशिष्टसत्ताभावस्य प्रतियोगिवैयधिकरण्यक्षतिरतो निरुक्तेति।
इत्थं च समवायस्यैकत्वेपीति ग्रंथस्तु शुद्धस्य कस्मिंश्चिदधिकरणे कस्यचित्संबंधत्वं न तु तत्तन्निरूपितस्येत्याश
येन योज्य इत्याहुः॥ स्वरूपसंबंधेनेति। गगनादेरवृत्तित्वप्रवादस्तु संयोगसमवायपर इति भावः। निरुक्तप्रति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२६

भाग्यनधिकरणं। प्रतियोगितावच्छेदकसंबंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यधिकरण
भिन्नं। प्रतियोगितासामान्ये। तादृशप्रतियोगितासामान्ये। धूमवान्वह्नेरित्यादौ घटाभावप्रतियोगिता
यामुभयाभावसत्त्वादतिव्याप्तिरतः सामान्येति॥ वह्निमान्धूमादित्यादौ समवायावच्छिन्नवह्न्यभा
वसंयोगावच्छिन्नमहानसीयवह्न्यभावप्रतियोगितयोरेकैकाभावसत्त्वादुभयाभावपर्यंतानुधावनं।
तेन संबंधेनेति॥ न चैवं समवायेन गगनादेरपि व्यापकत्वं स्यात्समवायेन गगनाभावस्य प्रतियोगिव्यधिकरणत्वा
भावादिति वाच्यं॥ तथात्वेपि सामानाधिकरण्याभावेनैव व्याप्तिलक्षणे निवेशाभावात्॥ गगनादिव्यावृत्तं व्यापकत्व व
स्य निर्वचनीयत्वेन साध्यतावच्छेदकसंबंधेन यत्किंचिदधिकरणवृत्तितावच्छेदकत्वेन व्यापकतावच्छेदके
विशेषणीयं॥ तेन वह्न्याकाशोभयत्वादिनापि न व्यापकतेति॥ यद्धर्मावच्छिन्नत्वसंअभावप्रतियोगिता ३
निष्ठविलक्षणं निवेश्यं॥ अन्यथा विषयतया ज्ञानावच्छिन्नस्य समवायेन साध्यतायां ज्ञानावच्छिन्न
सुखवान्दुःखादित्यादौ हेतुसमानाधिकरणघटाद्यभावप्रतियोगितायां ज्ञानावच्छिन्नत्वसमवाय
संबंधावच्छिन्नत्वोभयाभावसत्त्वात् अव्याप्त्यापत्तेः। तदपि साध्यतावच्छेदकतावच्छेदकसंबंधेन बोध्यं॥
तेन वह्निमान् वह्न्यवयवत्वादित्यादौ समवायेन साध्यतायां विषयितया वह्नित्वविशिष्टस्य ज्ञानादेर्यो
भावस्तत्प्रतियोगितायां विषयितया वह्नित्वावच्छिन्नत्वसमवायसंबंधावच्छिन्नत्वोभयासत्त्वेपि नाव्या
प्तिरिति विषयितया मेयत्वविशिष्टस्य ज्ञानादेरभावप्रतियोगितायां विषयितया मेयत्वावच्छिन्नत्वस्य प्रसि ह
द्धावपि स्वरूपसंबंधेन साध्यतावच्छेदकतावच्छेदके न तदवच्छिन्नत्वप्रसिद्ध्याऽव्याप्तिरत आह॥ मेयत्वादरपीति॥

स्वस्या १

CC-0, In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गगनादेरवृत्तित्वपक्षेपि पूर्वकल्पो न सुस्थ इति दर्शयति। अत एवेति॥ अस्यंत्र संयोगस्य द्वित्वावच्छिन्नप्र
तियोगिताकत्वविरहेपि द्रव्यं जातेरित्यादौ नातिव्याप्तिरित्यन्वयः॥ विरहेपीति। तथाच पूर्वकल्पेपि तत्रातिव्याप्ति
संभावना नेत्यर्थः॥ नन्वेवं वन्हिधूमोभयवान्धूमादित्यत्राव्याप्तिः॥ संयोगसामान्ये द्वित्वावच्छिन्नप्रतियोगिकत्व
विरहादिति वाच्यं निरुक्तप्रतियोगिकत्वेस्यनेन प्रतियोगित्वावच्छेदकावच्छिन्नविशिष्टधीनियामकत्वविशे
षस्य संसर्गनिष्ठस्य विवक्षितत्वात्॥ उभयत्वावच्छिन्नविशिष्टधीनियामकत्वं च एका[illegible]करणकोभयत्वावसंयो
गद्वये एकमेव॥ अन्यथा पर्वतो वन्हिधूमोभयवान् इति प्रतीत्यनापत्तेः॥ एवमेव चैत्रानुयोगिकदंडप्रतियोगि[illegible]
गौ संयोगेपि चैत्रान्यत्वविशिष्टदंडप्रतियोगिकसामान्याभावादुभयाभावः संगच्छते॥ इत्थं च संयोगस्येत्यस्य अयोगोल[illegible]
कानुयोगिकसंयोगस्येत्यर्थः॥ महानसवृत्तिसंयोगद्वये द्वित्वावच्छिन्नप्रतियोगिताकत्वसत्त्वा[illegible]दिति ध्येयं॥
विरहेपि च इत्यत्र चकारः प्रामादिक इति बहवः॥ वन्हिधूमोभयवान्धूमादित्यादौ संयोगस्य द्वित्वावच्छिन्न
प्रतियोगिताकत्वविरहेपि च नातिव्याप्तिरव्याप्ति[illegible]वा इत्येव पाठ[illegible] इत्यन्ये। [illegible]। साध्यसाधनभेदेन लक्ष
णभेदाद्वन्हिधूमोभयवान्धूमादित्यादौ उभयत्वावच्छिन्नसाध्यके व्याप्तिलक्षणनिरुक्तपक्षप्रहाणे संभव इत्यतः
तत्र निरुक्तपदं न देयं॥ तथाच वन्हिधूमोभयवान्[illegible] स्पष्टैव नेति सादौ अतिव्याप्ति[illegible]रित्याह। वन्हि
धूमोभयवानित्यादिना॥ विरहेपि चेति॥ तथाचासंभवसंपादकतया निरुक्तपक्षप्रहाणे पद इत्येतत्स्वरूपं च त्रायेति।
यथाश्रुतमेव सम्यगिति ध्येयं॥ ननु प्रतियोगित्वं स्वरूपसंबंधविशेषः। तत्र च नियमघटितसंबंधत्वप्रवेशा
एतस्मात्त्रय इत्यत आह॥ प्रतियोगित्वादिस्येवेति॥ आदिना अनुयोगिकत्वनिरूपितवृत्तित्वानां परिग्रहः॥ न
संबंधत्वेनेति। किंतु प्रतियोगित्वत्वादिना संबंधविधया[illegible]निष्ठ इति भावः। ननु सामानाधिकरण्यसंबंधिसंबंधित्वं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र च संबंधित्वप्रवेशादात्माश्रय इत्यतः सामानाधिकरण्येपीति॥ ननु यत्र संबंधसामान्येनैव व्याप्तिः तत्र संबंधि
त्वं निविष्टमतो दर्शितं चेति। प्रकारताविशेष्यतान्यविशिष्टधीविषयत्वादिरूपमित्यर्थः॥ अभावत्वं द्रव्यादिषट्का
न्योन्याभावत्वं तथा चाभावसाध्यकव्यभिचारिण्यतिव्याप्तिरत आह॥ अभावत्वं चेति॥ इदमिह नास्तीति प्रतीति
नियामकाभावाभावसाधारणाभावत्वप्रवेशे गौरवात्तेन साध्यतायां घटभिन्नं मेयत्वादित्यादौ व्यभिचारिण्यतिव्या
प्तिस्तादृशप्रतीतिनियामकाभावप्रतियोगितामात्रतादात्म्यावच्छिन्नत्व त्याभावे नोभयाभावसत्वादत इदमिदं
न भवतीत्युक्तं। भावाभावसाधारणा इति भावस्वरूपाभावमात्रप्रवेशे भावसाध्यकव्यभिचारिणि अतिव्याप्तिर
तोभावपदोपादाने यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितायामनुभ
याभावविवक्षयैव सामंजस्ये तदुपादानं न कर्तव्यमित्याह॥ तदपीति॥ ननु घटाभावप्रतियोगित्वं घटस्वरू
पं घटत्वस्वरूपं वा आद्ये घटोऽभावप्रतियोगीत्यस्य घटो घटाभाववानित्यर्थः स्यात् तथा चाननुभवः द्विती
ये घटोऽभाववान् घट इत्याकारः स्यात् तत्रापि स एव दोषः एवमधिकरणासमवेतिनसंयोगादिरूपं चेदस्यापि कुंडा
धारत्वप्रसंगादत आह विषयतेति। नैयायिकैकदेशिनाप्यतिरिक्तविषयतास्वीकारात् न स्याद्दृष्टान्तता अत
एवातिरिक्तविषयतावादिमते इति तत्र तत्र दर्शयति तत्त्वादीति विषयतात्वादीत्यर्थः॥ आदिना प्रकारताविशे
ष्यतात्वपरिग्रहः तत्सेति। प्रतियोगितात्वाधिकरणतात्वेत्यर्थः। प्रतियोगितानवच्छेदकेत्यत्रावच्छेदकत्वं किमि
ति तन्निरूपयति नन्वित्यादिना इह हेतुलक्षणे संभवति समनियते संभवति। ननु प्रमेयधूमत्वस्य धूमत्वघ
टितत्वाद्वक्ष्यमाणरीत्या नात्र धूमत्वभेदसंभव इत्यत आह॥ कंबुग्रीवेति। कंबुग्रीवादिकं संस्थान
वजातिभेदः परंपरासंबंधेन तदस्यैव कंबुग्रीवादिमत्त्वं अत एव गौरवमपीति भावः॥ ननु पार्थिवत्वादि॥

इति सिद्धान्तलक्षणं समाप्तं ।४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केचित्तु ॥ साधनसमानाधिकरणव्याप्यवृत्तिसाध्याभावकूटे साध्यसामाना
धिकरणपमपि विशेषणं ॥ व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभावघ
टितकूटे साध्यसामानाधिकरण्याप्रसिद्धेरेव नातिव्याप्तिरिति ॥ स्याहुः ॥ छ ॥ छ ॥ छ ॥
॥ श्री ॥ चतुर्दशलक्षणीसमाप्तेयं ॥ श्री ॥ कृष्णाय वासुदेवाय हरये परमात्मने ॥ प्र
णतक्लेशनाशाय गोविंदाय नमो नमः ॥ श्रीरघुवीरचरणारविंदाभ्यां नमः ॥ श्रीकृष्ण
परमात्मने नमः ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

K K S U LIBRARY
RAMTEK
441 106
M-7080
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=28.08.20 11:39
,TRANSFERRED=2020/08/28 at 15:45:01
,PAGES=202
,TYPE=STD
,NAME=S0003560
,Book Name=M-1529-SHIROMANI TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection